**Kalika Prabha : Journal of Multidisciplinary Studies**
[ISSN:- 3021-9388 (Print)]
Published by Kalika Sanskrit Vidyapeeth (RMC) Nawalpur, Nepal
https//www.ksv.edu.np

# अन्तर्जालतो गृहीतसामग्रीणां संस्कृते सन्दर्भाङ्कनप्रक्रिया

**भवानीशङ्करभट्टराईः** (विद्यावारिधिः)[1], **महानन्दतिमल्सिना**(विद्यावारिधिः)[2], **कृष्णप्रसादभण्डारी**(विद्यावारिधिः)[3]

*[1]सहप्रा., नव्यव्याकरणविषयस्य | [2]सहप्रा., साहित्यविषयस्य | [3]सहप्रा., आङ्ग्लविषयस्य,*

*नेपालसंस्कृतविश्वविद्यालयः पिण्डेश्वरविद्यापीठम्*

***Article History :** Received : 6th, Jan. 2026; Reviewed: 17th, March 2026; Accepted: 4th; June, 2026*
***Corresponding Author** : Bhawanishankar Bhattarai, PhD **E-mail :** dikshitbhattarai072@gmail.com*
***DOI :** https://doi.org/10.3126/kp.v4i1.97036*

## लेखसारः

*अन्तर्जालं नाम जालपुटम्। अत्र संस्कृतशोधोपयोगिन्योऽनेकाः सामग्र्यो दृश्यन्ते। शोधार्थिभिरमुष्मात् स्थानात्-पिडिएफपुस्तकानि, शोधपत्रिकाः, प्रतिवेदनानि, सूचनाः, प्रवचनानि, विचाराः, अनुभूतयः, सिद्धान्ताः, धारणाः, श्रव्यदृश्यसामग्र्यः, प्रस्तुत्यादीनि यथाप्रयोजनम् आह्रियन्ते। तथा गृहीतानां सामग्रीणामन्ते मध्ये च स्रोतोनिर्देशो हि सन्दर्भाङ्कनम्। सन्दर्भाङ्कनार्थम्- एपिए-एमएलए-सिकागोप्रभृतिभिरनेकैराधुनिकैः शैलीकारैः स्वानुकूला आचारा निर्धारिताः। परं संस्कृतशैलीकारैः स्रोतोनिर्देशे प्रविधौ च स्पष्टतयाऽननुशासनात् प्रतिशैक्षिकसंस्थानं प्रतिगवेषणकेन्द्रं च भिन्नशैलीप्रयोगजन्या अव्यवस्था जायमाना दरीदृश्यते। अनेन कारणेन संस्कृतशोधेषु प्रविधिसौगन्धं प्रतिक्षणं क्षीयमाणमनुभूयते। विषयमिमं मुख्यां समस्यां मत्वा संस्कृतशोधार्थिभिरन्तर्जालतः सामग्रीषु गृहीतासु तासां सन्दर्भाङ्कनप्रक्रिया सरला जायेत, तत्र दिग्दर्शनं लभ्येत इति धिया प्रकृतशोधनिबन्धः प्रकल्प्यते। अतोऽनेन निबन्धेन मूलतो जालपुटतोऽवान्तरतो भौतिकपुस्तकपत्रिकादिभ्यश्च सामग्रीषु गृहीतासु गर्भटिप्पन्यां पादटिप्पन्यां सन्दर्भसामग्रीसूच्यां च तासां सन्दर्भसमुल्लेखनप्रक्रिया निर्दिश्यते। एतस्मिन् क्रमे- अन्तर्जालतो गृहीतसामग्रीणां सन्दर्भाङ्कनप्रक्रिया' इत्यस्य कोऽर्थः ? ततो गृहीतसामग्रीणां सन्दर्भाङ्कनं केन प्रकारेण विधीयते ? तथाविधायाः सन्दर्भाङ्कनप्रक्रियायाः किं मूल्यमिति प्राविधिकं प्रश्नत्रयं कृत्वा तन्माध्यमेन समस्याया अध्ययनमत्र विधीयते। अत्र वैद्युत-(Digital)संसाधनभौतिकपुस्तकादीनां सन्दर्भाङ्कने समानां प्रक्रियां प्रस्ताव्य क्रमशः स्रोतस्समुद्धरण-(सत्यावश्यके) लेखकनाम-पृष्ठसङ्ख्या-पृष्ठाङ्काँश्च समुल्लिख्य गर्भटिप्पनीनिर्माणाय परामर्शः प्रदीयते। तथैव यया रीत्या गर्भटिप्पनीरचिता तयैव रीत्या पादटिप्पन्यपि रचनीयेति प्रस्ताव्यते, यथा- आदौ स्रोतस्समुद्धरणं ततो लेखकनाम ततः पृष्ठसङ्ख्या ततश्च पृष्ठाङ्कलेखनायात्र प्रस्ताव्यते। पुनश्च एकपङ्क्तियुता कविता वा गद्यं पाठमध्ये तस्यामेव*

*पङ्क्तौ ततोऽधिका तु तस्मादधस्ताद् भिन्नानुच्छेदे स्थापनीयेति परामृश्यते। सन्दर्भसामग्रीसूची तु ग्रन्थपद्धत्या ग्रन्थकारपद्धत्या वा निर्मेयेति प्रकृतलेखस्य प्रस्तावः। प्राचीना वेदोपनिषदारण्यकब्राह्मणग्रन्थसदृशा महत्त्वाधायिनोऽनेके ग्रन्था लेखकरहिताः केचन लेखकगोपिता अपि सन्तीति स्पष्टमेव। तेषां सन्दर्भाङ्कनमधुनापि ग्रन्थपद्धत्या जायमानमस्तीति तदनुरोधेन प्राचीनानां ग्रन्थकाररहितानां ग्रन्थानां सन्दर्भाङ्कनं ग्रन्थपद्धत्या तदितरेषान्तु ग्रन्थकारपद्धत्या विधेयमिति प्रकृतलेखस्य प्रस्तावः। ग्रन्थपद्धतौ ग्रन्थो ग्रन्थकारपद्धतौ तु ग्रन्थकार आदौ आयाति, अन्यत् सर्वं समानमिति तदनुसारमेव सन्दर्भसामग्रीसूच्यामपि- आदौ ग्रन्थो ग्रन्थकारो वा, ततः टीकानुवादकादीनां नाम (कोष्ठके), ततो भौतिकसामग्रीषु प्रकाशक-प्रकाशनस्थान-प्रकाशनवर्षाणि क्रमशो लेखनीयानीति प्रस्ताव्यन्ते। जालसङ्केतयुतानां लेखानां समुद्धरणे तु प्रकाशकप्रकाशनस्थाने नावश्यके। यतो हि जालादेव उक्ता सूचना लभ्यत इति हेतोस्तथैव प्रयोगार्थं परामृश्यते। पत्रिकाभ्यः सन्दर्भसामग्रीसूचीनिर्माणे तु किञ्चिद् वैशिष्ट्यं भवतीति तदनुसारमेव- लेखकनाम/पत्रिकानाम-लेखशीर्षक-वर्ष-अङ्क-प्रकाशनतिथि-प्रकाशक-प्रकाशनस्थानानि क्रमशो लेखनीयानीति प्रस्ताव्यन्ते। शोधनिबन्धे अन्तर्जालसङ्केते विद्यमाने सति तु प्रकाशकस्तत्स्थानयोश्च त्यागायात्र परामृश्यते। गर्भपादटिप्पन्योः सन्दर्भसामग्रीसूच्याश्च निर्माणे सारल्यमालभ्येत इति धिया शोधनिबन्धोऽयं विरचितोऽस्ति। निबन्धोऽयं मूलत एपिए-(सप्तमसंस्करणम्) शैल्या दिङ्निर्देशमनुपालयति।*

**कूटशब्दाः**- गर्भटिप्पनी, पादटिप्पनी, संस्कृतसन्दर्भाङ्कनम्, सामाजिकजालपुटम्, स्रोतोनिर्देशः।

## विषयपरिचयः समस्याया उद्भावनञ्च

शोधक्षेत्रे सन्दर्भशब्दस्यार्थो भवति- कस्याप्युद्धरणस्य स्रोतो मूलभाण्डागारमुपजीव्यं वा। तस्याङ्कनं समुल्लेखनमेव सन्दर्भाङ्कनम्, अर्थाद् उद्धृतसामग्र्याः स्रोतोनिर्देशप्रक्रिया हि सन्दर्भाङ्कनम्। तथाविधमङ्कनं आङ्ग्लक्षेत्रे द्वेधा विधीयते- सङ्क्षेपेण विस्तारेण च। सङ्क्षेपेण पाठमध्ये पादटिप्पन्यां वा विधीयते चेद् विस्तारेण तु शोधनिबन्धान्ते सन्दर्भसामग्रीसूचीत्वेन क्रियते। तथाविधस्य सन्दर्भाङ्कनस्य पारिभाषिकं नाम टिप्पनी (Citation) इति। सा च टिप्पनी गर्भटिप्पनी (In-text Citation) एवं पादटिप्पनी (Footnote) चेति द्विधा विभज्यते। एवमेव विस्तारेण कृतस्य स्रोतोनिर्देशस्य पारिभाषिकं नाम सन्दर्भसामग्रीसूची (Reference/Bibliography/Work-cited) वर्तते। शोधरचनायां प्रयुज्यमानेषु नैकेषु स्रोतस्सु साधनेषु च अन्तर्जालमप्येकम्। अत्र विद्युत्-पुस्तकम् (E-book), जालनिक्षिप्तशोधपत्रिका (Online Journal), शोधसङ्ग्रहालयः (Digital repositories library), सामाजिकजालपुटम् (Social network), शैक्षिकजालपुटम् (Educational website) इत्यादीनि आयान्ति। संस्कृतभाषावाङ्मयसम्बद्धेषु आधुनिकशोधनिबन्धेषु पूर्वोक्तानामितरेषां वैद्युतसंसाधनानां च प्रयोगो यथास्थानं यथावश्यकं च विधीयमानं वर्तते। परमधुना विरचितेषु शोधनिबन्धेषु वैद्युतस्रोतसः प्राप्तानामुद्धरणानां स्रोतोनिर्देशविषये शोधच्छात्रेषु स्पष्टता नास्तीति प्रमुखा समस्या। एपिए-एमएलए-प्रभृतीनाम् आधुनिकशैलीनामनवबोधेन

परम्परितप्रक्रियामोहादिना वा साम्प्रतिकाः शोधच्छात्रा प्रायः शोधेषु URL (Web Address, exam- https ://google. com), DOI, Social Media Handles, Cloud address, Email address, IP address इत्यादि न प्रयुञ्जते। कतिपयेऽनुसन्धातारोऽन्तर्जालतः PDF, DOC/DOCX, ODT, RTF, TXT प्रकृतिकाः सामग्रीर्गृहीत्वापि तेषां सन्दर्भाङ्कनं परम्परितरीत्यैव कुर्वन्तीति सापि समस्यैव। एतद्विधेषु शोधान्तरालेषु विद्यमानेष्वपि प्रकृतविषये पूर्वानुसन्धातृभिरननुसंहितत्वेन विषयस्यास्यानुसन्धेयत्वेन च शोधलेखोऽयं पुरस्क्रियते। एतस्मिन् क्रमे च अन्तर्जालतो गृहीतसामग्रीणां सन्दर्भाङ्कनप्रक्रिया-परिचयः, अन्तर्जालतो ग्राह्याणां शोधोपयोगिसामग्रीणां प्रकाराः, सामग्रीसन्दर्भाङ्कनस्य आधुनिकः परम्परितश्च विधिः, तेषामुदाहरणादीनि च क्रमशः प्रस्तूयन्ते।

## शोधसमस्या प्रश्नाश्च

सम्प्रति प्रकाशिता भाषासाहित्यादिविषयसम्बद्धाः प्रायः संस्कृतशोधनिबन्धाः परम्परितसन्दर्भाङ्कनपद्धत्या रचिता दृश्यन्ते। ते सङ्क्षिप्तसन्दर्भाङ्कने विस्तृतसन्दर्भाङ्कनेऽपि प्रायो मुद्रितपुस्तकान्येवाश्रयन्ति। चित्रग्राहिसाधन-(Cam Scanner) द्वारा चित्रं गृहीत्वा जालपुटादिषु स्थापितानां पुस्तकानां स्रोतोनिर्देशमपि उद्धर्तारः प्रायः प्राचीनशैल्या एव कुर्वन्ति। तथाविधानां कतिपयानां पुस्तकानां वैद्युतसामग्रीणाञ्च वैद्युतसङ्केतेषु सत्स्वपि स्रोतोनिर्देशकाले URL, DOI, Cloud address, Social Media address इत्यादिकान् सङ्केतान् न्यक्कृत्य गर्भटिप्पन्यां पादटिप्पन्यां सन्दर्भसामग्रीसूच्यां च क्वचित् परम्परितशैल्या क्वचिच्च समानान्तरविश्वविद्यालयेन निर्धारितनियमेन च सन्दर्भोद्धरणं कुर्वन्तीति वैद्युतसामग्रीणां स्रोतोनिर्देशे महती समस्या नवषु शोधार्थिषु भ्रम उत्पद्यते। स्रोतोनिर्दिष्टेषु केषुचित् स्थानेष्वपि प्रक्रियायामनेकता दृश्यते। एतेन प्रकृतविषये जिज्ञासुषु नवशोधार्थिषु च भ्रमो जायमानोऽस्ति। एतावतीषु समस्यासु सतीष्वपि प्रकृते विषयेऽद्यावधि कैश्चिदप्यनुसंहितः, मार्गः प्रस्तावितश्च न प्राप्यते। अतोऽत्र प्रयत्न आवश्यक इति विचार्य वैद्युतसंसाधनानां साम्प्रतिकेषु लेखेषु प्रयोगस्थितिनिभालनं वैद्युतसन्दर्भाङ्कनप्रक्रियानिर्देशश्चावश्यक इत्यनुभूय प्रकृतेन लेखेन तत्र प्रयत्नो विधीयते। अत्र उपर्युक्तां मुख्यसमस्यां समाश्रित्य- कः, केन प्रकारेण, कस्मै चेत्यादिकं प्राविधिकं प्रश्नत्रयं क्रमशोऽधस्तात् पुरस्क्रियते।

क) 'अन्तर्जालतो गृहीतसामग्रीणां सन्दर्भाङ्कनप्रक्रिया' इत्यस्य कोऽर्थः ?

ख) ततो गृहीतानां सामग्रीणां सन्दर्भाङ्कनं केन प्रकारेण विधीयते ?

ग) तथाविधायाः सन्दर्भाङ्कनप्रक्रियायाः किं मूल्यम् ?

## उद्देश्यकथनम्

क) 'अन्तर्जालतो गृहीतसामग्रीणां सन्दर्भाङ्कनप्रक्रिया' इत्यस्यार्थावबोधः,

ख) ततो गृहीतानां सामग्रीणां सन्दर्भाङ्कनप्रक्रियानिर्देशः,

ग) तथाविधायाः सन्दर्भाङ्कनप्रक्रियायाः मूल्योपन्यासः।

## अध्ययनविधिः शोधसीमा च

प्रकृतः शोधलेखः प्रायो द्वितीयकस्रोतसि तथा पुस्तकालयसामग्रीषु समाश्रितो गुणात्मकप्रकृतिवान् वर्तते। अत्र परम्परितपुस्तकालयेन, वैद्युतपुस्तकालयेन, प्रतिकृतिचयनपद्धत्या च सामग्र्यो गृहीताः सन्ति। ताश्च वर्णनव्याख्यानविश्लेषणादिभिर्विश्लिष्य निष्कर्षो निष्पादितो वर्तते, अतोऽत्र वर्णनात्मक-व्याख्यानात्मक-विश्लेषणात्मका विधयो यथायथं प्रयुज्यन्ते। अत्र सामग्रीविश्लेषणे प्रायो निगमनात्मको विधिरुपयुज्यते। एवमेव सन्दर्भाङ्कने सन्दर्भसामग्रीसूचीनिर्माणे च प्रायो लेखकमितिपद्धतिः (APA 7th ed.) प्रयुज्यते। तथापि आधुनिकपद्धत्या सह संस्कृतानुसन्धानस्य प्रकृतिभिन्नेषु स्थानेषु परम्परिता पद्धतिरपि यथावश्यकं प्रयुज्यते।

प्रकृतशोधस्य क्षेत्रं सीमा च संस्कृतशोधनिबन्धः। अस्य कालिकी वैषयिकी च सीमा पञ्चवर्षपूर्वतोऽधुनावधि संस्कृतभाषायां प्रकाशिता भाषासाहित्यादिविषयसम्बद्धा विद्यावारिधिस्तरीयाः, आचार्यस्तरीयाः, स्वतन्त्राश्च संस्कृतशोधनिबन्धा वर्तन्ते। ते च मूलतो भारतीयशोधनिबन्धभाण्डागारः 'शोधगङ्गा' इत्यस्मात्, नेपालदेशीयशोधनिबन्धभाण्डारगारः TUCL इत्यस्मात् तथा नेपालभारतदेशयोः स्थितेभ्यः संस्कृतपुस्तकालयेभ्यो गृह्यन्ते। तथाविधेभ्यः स्रोतोभ्यः सोद्देश्यप्रतिकृतिचयनपद्धत्या १० शोधनिबन्धान् गृहीत्वा तत्रत्यानि सन्दर्भाङ्कननिदर्शनानि आश्रित्य साम्प्रतिकेषु संस्कृतशोधनिबन्धेषु वैद्युतसन्दर्भाङ्कनस्थितिनिभालनं भाविशोधाय वैद्युतसन्दर्भाङ्कनप्रक्रियाप्रस्तावश्च प्रकृतेन लेखेन विधीयते।

## कृतकार्यविवरणम्

संस्कृतशोधनिबन्धार्थमावश्यकानां वैद्युतसामग्रीणां सन्दर्भाङ्कनप्रक्रियानिदेशको कश्चिद् लेखोऽनुसन्धानं वा अद्यावधि न लभ्यते। तथापि संस्कृतवाङ्मयक्षेत्रे वैद्युतसंशाधनप्रयोगस्थितिसम्बद्धाः तन्निकटाश्च केचन लेखा इतः पूर्वं प्रकाशितेषु जालपुटेषु स्थापिता दृश्यन्ते। तेषां विवरणमत्र क्रमशः समुल्लिख्यते।

**विक्रमजित-आकाङ्क्षा पार्मर** (ई.२०२३) प्रभृतयोऽनुसन्धातार आङ्ग्लभाषानिबद्धे- *संस्कृतसम्बद्धेषु जनेषु सूचनासाक्षरताया ज्ञानम्* इति शीर्षकान्विते लेखे संस्कृतसम्बद्धेषु प्राध्यापकेषु गवेषकेषु च प्रविधिप्रयोगविषये कियद् ज्ञानं वर्तत इति अधीयते। तेषां संयुक्ताध्ययनेन भारतदेशस्य केन्द्रीयसंस्कृतविश्वविद्यालयान्तर्गते वेदव्यासविद्यापीठस्थे बाल्हरनामके स्थाने स्थितेषु संस्कृतप्राध्यापकेषु अनुसन्धातृषु च वैद्युतसंशाधनप्रयोगविषये मध्यमस्तरीयं ज्ञानं प्राप्यत इति निष्कर्षो निष्पादितो दृश्यते।

**विपिनकुमारझा** (ई.२०२४) संस्कृतविमर्श इत्याख्यायां पत्रिकायां- *संस्कृतानुसन्धानार्थं वैद्युत उपकरणानामुपयोगिता* इति शीर्षकयुते लेखे प्राह- वर्तमानकाले संस्कृताध्ययननिमित्तानि वैद्युतसंसाधनानि अल्पान्येव सन्ति तथापि एतत् संस्कृतक्षेत्रं क्षमतायुक्तं वर्धमान-बहुविधसम्पत्सम्पन्नं च दृश्यते।

सामान्यडिजिटलोपकरणानां प्रयोगो मानवीययत्नेन सह न केवलं संस्कृताध्येतॄणां कृतेऽपि तु विद्यमानभाषासंसाधनानां कृतेऽपि अत्यन्तं लाभाय बोभवीतीति निश्चप्रचम्।

**के.अब्दुलरसिदः** (ई.२०२४) *संस्कृतवाङ्मयस्य वैद्युतयात्रा- व्याकरणतः एल्गोरिदमपर्यन्तम्* इत्याख्ये आङ्ग्लभाषानिबद्धे लेखे- संस्कृतवाङ्मयं प्राचीनकालत आधुनिककालपर्यन्तं समागच्छत् प्रविधिमैत्रि सञ्जायमानमस्ति, पाणिनीयव्याकरणस्य अन्तर्जालप्रवेशेन समारब्धेयं वैद्युतयात्रा कम्प्युटेसनल-उपकरण-विकासः, अन्तःपाठाध्ययने कृत्रिमबौद्धिकता- (AI) याः प्रयोगः, अन्तर्जालप्रविष्ट्या प्राचीनसामग्रीणां संरक्षणं तेषां सुलभीकरणमित्यादिषु कार्येषु गच्छन्ती अस्तीति महतः सौभाग्यस्य विषयोऽयम्। अस्मिन् कर्मणि अनेकाः समस्या अपि वर्तन्ते तथापि क्रमबद्धविन्यासेन व्यवस्थितप्रयासेन च वाङ्मयमिदं तथाविधाः समस्याः समादधद् अस्तीति- संस्कृतवाङ्मयस्य वैद्युतयात्रा- व्याकरणत एल्गोरिदम्पर्यन्तं व्यवस्थिततया गच्छन्ती वर्तत इति निश्चीयते।

**श्रीरवीन्द्रसूर्यकान्तकाले** (ई.२०२४) *अन्तर्जाले संस्कृतसम्बद्धाः सामग्र्यः* इति शीर्षकयुते लेखे- अन्तर्जाले अन्यविषयैः सह संस्कृतवाङ्मयस्यापि अनेके पटलाः (platforms) प्राप्यन्ते। यथावश्यकं तेषामध्ययनं संस्कृतच्छात्रैः कार्यमिति कथयन् तेषां वैद्युतसङ्केतादिकं विस्तृतरूपेण प्रस्तौति।

एतद्विधेषु प्रायो लेखेषु अन्तर्जालतो गृहीतानां सामग्रीणां सन्दर्भाङ्कनं केन प्रकारेण कथञ्च विधीयत इति विषये किमपि भाषितं न प्राप्यत इति हेतोरत्र शोधान्तरालं प्राप्य शोधनिबन्धोऽयं प्रकल्प्यते।

## विषयविश्लेषणम्

### संस्कृतशोधार्थमुपयोगीनि अन्तर्जालस्रोतांसि

संस्कृतशोधार्थं महत्त्वाधायकानाम्- विद्युत्पुस्तक-जालनिक्षिप्तशोधपत्रिका-शोधसङ्ग्रहालय- सामाजिक-जालपुट-शैक्षिकजालपुटप्रभृतीनां जालस्रोतसां सङ्क्षिप्तपरिचयः संस्कृतशोधेषु तेषां प्रयोगस्थितिश्चात्र क्रमशः पर्यालोच्यते।

### *विद्युत्पुस्तकानां संस्कृतशोधेषु प्रयोगस्थितिः*

***विद्युत्-पुस्तकम् (E-book) इत्यस्य संस्कृतशोधेषु प्रयोगस्थितिः*** : विद्युत्पुस्तकं नाम वैद्युत- (Digital) संसाधने निक्षिप्तं (Uploaded) पुस्तकादिकम्। तत्र निक्षिप्तेषु पुस्तकेषु कानिचन विद्युत्सङ्केत- DOI/URL युक्तानि भवन्ति चेत् कति तु तद्रहितान्यपि। आधुनिकेषु लेखेष्वपि समुद्धरणसङ्केतस्थाने गर्भमध्ये विद्युत्सङ्केतसमुल्लेखो न विधीयते। अतः संस्कृतशोधनिबन्धेष्वपि तमेवानुकृत्य गर्भटिप्पनीमध्ये विद्युत्सङ्केतो न उल्लिख्यते। आधुनिका अस्य सङ्केतस्य समुल्लेखनं सन्दर्भसूच्यां कुर्वन्तीति संस्कृतशोधार्थिन अपि तदेवानुकुर्वन्ति।

वैद्युतसंसाधनेषु प्रकाशितानि विद्युत्पुस्तकानि अन्तर्जालपुटे तत्र योग्य आकारप्रकारे च तदीयनियमानुसारेण प्रकाश्यन्ते। तथाविधाः सामग्र्यः सुसाङ्ख्य-ट्याबलेट-स्मार्टफोन-प्रभृतिभिर्वैद्युतोपकरणैः सरलतया पठनीयानि भवन्ति। लेखकेन प्रकाशकेन वा तादृशानि पुस्तकानि PDF, EPUB, MOBI, AZW इत्यादिषु स्वरूपेषु अनुकूलीकृत्य जालपुटे निक्षिप्यन्ते। तेभ्यः कानिचन निःशुल्कानि कानि सशुल्कानि च भवन्ति। तथाविधानां पुस्तकानां वैद्युतसङ्केतो जालपृष्ठस्योपरि अन्वेषणपट्टिका (Search bar) इत्यत्र उपलभ्यते। जिज्ञासवोऽनुसन्धातारोऽन्वेषणपट्टिकायां स्थितं सङ्केतं प्रतिलिपीकृत्य उद्धृतसामग्र्या अन्ते प्रस्तोतुं शक्नुवन्ति। muktabodh.org, sanskritlibrary.org इत्यादयोऽनेकशः पुस्तकालया वैद्युतपुस्तकप्राप्तिस्थानानि सन्ति।

***जालनिक्षिप्तशोधपत्रिका (Online Journal / e-Journal) इत्यस्य संस्कृतशोधेषु प्रयोगस्थितिः*** मुद्रणस्य विकल्परूपेण जालपुटेषु निक्षिप्ता शोधपत्रिका एव जालनिक्षिप्तशोधपत्रिका वर्तते। जालपुटेषु पत्रिकाभण्डारणाय वितरणाय च प्राप्तिस्थानरूपं कञ्चित् सङ्केतं निर्माय तत्र एतद्विधाः शोधपत्रिका निक्षिप्यन्ते अनुसन्धातृभिरन्विष्टासु सरलतया प्राप्यन्ते च। एतद्विधाः पत्रिका जालपुटे पिडिएफ/एचटिएमएलप्रभृतिषु स्वरूपेषु तत्र प्रेष्यन्ते तस्मात् स्थानात् सार्वजनिकीक्रियन्ते च। अधुना संस्कृतक्षेत्रेण निर्मीयमाणेषु बहुषु शोधलेखेषु एतद्विधानां शोधपत्रिकाणां प्रयोगो दृश्यते। एतन्माध्यमेन जालपुटे पत्रिकायां निक्षिप्तायां जिज्ञासुभिः पाठकैर्यथानुकूलमध्ययनस्य, तस्मात्सारोद्धरणस्य, तत्र परामर्शप्रदानस्य चावसरः प्राप्यते।

***शोधसङ्ग्रहालयः (Digital Repository) इत्यस्य संस्कृतशोधेषु प्रयोगस्थितिः*** शैक्षिकसंस्थानेन, अनुसन्धानकेन्द्रेण, पुस्तकालयादिना वा वैद्युतमाध्यमेन सङ्गृह्य वर्गीकृतानां संरक्षणीयानां शोधसामग्रीणां संरक्षणस्थानमेव शोधसङ्ग्रहालयो वर्तते। तथाविधैः सङ्ग्रहालयैः कथं केन वा विधिना एताः सामग्र्यः सुदीर्घकालपर्यन्तं गोपनीयाः सुलभतया सर्वजनेषु प्रापणीया इति च मुहुर्मुहुः चिन्त्यन्ते। तादृशेषु सङ्ग्रहालयेषु मूलतः- प्राचीनाः पाण्डुलिपयः, दुर्लभा ग्रन्थाः, श्रव्यदृश्यसामग्र्यः, चित्राणि, कोशाः, प्राचीनशोधग्रन्थादयश्च सुरक्षिततया वैद्युतमाध्यमेन निक्षिप्यन्ते, अवलोकनाय सरलीक्रियन्ते च। भाषासाहित्यादिविषयसम्बद्धेषु संस्कृतशोधेषु एतेषां प्रयोगस्थितिरधुनावधि सामान्यैव वर्तते।

***सामाजिकजालपुटम् (Social network) इत्यस्य संस्कृतशोधेषु प्रयोगस्थितिः*** प्रतिव्यक्ति, प्रतिसंस्थानम्, प्रतिसमुदायम्, प्रतिराष्ट्रं सम्पर्कस्थापनाय विस्ताराय च निर्मितं सूचनाऽऽदानप्रदानस्य वैद्युतसाधनमेव सामाजिकजालपुटम्। अत्र प्रयोक्तारः परिचयसङ्केतप्रदानेन तत्र स्वकीयं परिचयपटलं निर्मातुं तन्माध्यमेन परस्परं सम्पर्कं विधातुं च शक्नुवन्ति। तथैव स्वकीयात् स्थानात् श्रव्यदृश्यसामग्रीः निक्षेप्तुं, अन्यनिक्षिप्ताः सामग्रीः पठितुं तत्र स्वकीयमवधारणं प्रस्तोतुं च प्रभवन्ति। युट्युब-इन्स्टाग्राम-फेसबुक-ह्वाट्सएप-भाइबरप्रभृतीनि साधनानि एतेषामुदाहरणानि। अत्र अनेकेषां विदुषां व्याख्यानानि, प्रवचनानि, विचाराः, शोधलेखा अन्यविधा आवश्यक्यः सामग्र्यश्च सौलभ्येन प्राप्यन्ते। तथाविधाः सामग्रीरन्यैः सह परामर्शनेन अन्यमाध्यमेन वा सत्यापयित्वा निर्मीयमाणेषु

शोधनिबन्धेषु समुद्धर्तुं शक्यन्ते। वर्तमाने निर्मीयमाणेषु संस्कृतशोधनिबन्धेषु एतेषां प्रयोगः सामान्यतया विद्यमानेषु सत्स्वपि प्रयोक्तृभिः तेषामुल्लेखो न्यूनतरेषु स्थानेष्वेव कृतः प्राप्यते।

**शैक्षिकजालपुटम् (Educational website) इत्यस्य संस्कृतशोधेषु प्रयोगस्थितिः** विद्यालय-विश्वविद्यालय-गवेषणकेन्द्रादिभिः शैक्षिकसंस्थानैः स्वसम्बद्धसूचना-पाठ्यक्रम-पाठ्यपुस्तक-सहायकसामग्री-शोधप्रबन्धप्रभृतीः सामग्रीः निक्षेप्तुं निर्मितं वैद्युतसंसाधनमेव शैक्षिकजालपुटमिति। एतादृशं जालपुटं www./https: इत्याङ्ग्लाक्षरादारभ्यते। एतेषां प्रयोगेणैव दूरस्थाः छात्रा अपि विश्वविद्यालयेन प्रकाशितां सूचनामधिगम्य निर्दिष्टं कार्यं कुर्वन्ति। एतादृशानि शैक्षिकजालपुटानि प्रतिविश्वविद्यालयं प्रतिसंस्थानञ्च विभिन्नानि भवन्ति, यथा- www.nsu.edu.np, www.tuexam.edu.np इत्यादीनि। साम्प्रतिकेषु संस्कृतशोधेषु एतादृशानां शैक्षिकजालपुटानां प्रयोगः सामान्यतया दृश्यते। परम्परितेषु विषयेषु परम्परितैः गुरुभी रचितेषु शोधलेखेषु एतादृशानां जालपुटानां प्रयोगो प्रायो न प्राप्यते। तथापि शोधलेखेष्वस्य प्रयोगो वर्धमानोऽस्ति।

## *प्रतिकृतिचयनेन वैद्युतसंसाधनप्रयोगस्थितिपरीक्षणम्*

संस्कृतशोधनिबन्धेषु विद्युत्पुस्तकानां प्रयोगेषु जायमानेषु सत्स्वपि प्रायः संस्कृतानुसन्धातारः पुस्तकस्वरूपादेव सन्दर्भाङ्कनसङ्केतं समुट्टङ्कन्त इति बहूनां शोधप्रबन्धानामवलोकनेन बुध्यते। अतस्तथाविधेषु लेखेषु वैद्युतसंसाधनप्रयोगस्थितिनिभालनम्, अल्पीयस्सु स्थानेषु प्रयुक्तानां संसाधनानां प्रयोगप्रक्रियावबोधश्च अत्र विधीयते। एतदर्थमत्र सोद्देश्यप्रतिकृतिचयनपद्धति- (Purposive sampling method) द्वारा *शोधगंगा* इत्यस्मात् तथा *TUCL* इत्यस्माच्च विद्यावारिधिस्तरीयं प्रतिजालपुटं संस्कृतशोधद्वयं तथा नैपालशोधपत्रिकातो भारतीयशोधपत्रिकातश्च प्रत्येकं शोधलेखद्वयं चेति कृत्वा अष्टाभ्यो शोधनिबन्धेभ्यो वैद्युतसंसाधनप्रयोगस्थितिनिभालनमत्र विधीयते। तेनैव प्रकारेण संस्कृतलेखेषु सामाजिकसञ्जालादिभ्यः संसाधनेभ्यः स्रोतःसमुद्धरणस्थितिनिभालनमपि तयैव रीत्या विधीयते।

क) निगमपाण्डेयनामानुसन्धाता **संस्कृतविमर्शः** (२०२५, अङ्क-२७) इति पत्रिकायां- *भारतीयज्ञानपरम्परायां वृक्षायुर्वेदः* नामके शोधनिबन्धे २२ उद्धरणानि ८ सन्दर्भग्रन्थाँश्च प्रयुङ्क्ते। तेषु वैद्युतोपकरणानां प्रयोगेषु प्रतीतेष्वपि तेषामुल्लेखं तत्र न करोति।

ख) गोविन्दपाण्डेयनामानुसन्धाता **निबन्धमाला**नाम्न्यां वार्षिकशोधपत्रिकायां (वर्षः २०२३-२४, चतुर्दशपुष्पम्) *गीताया वैदिकत्वं वर्तमानसमाजे च तस्या उपयोगिता* इति शीर्षकयुते लेखे १२ उद्धरणानि तथा पञ्च सन्दर्भग्रन्थाँश्च प्रयुङ्क्ते। तदन्ते च अन्तर्जालीयस्रोतांसीति शीर्षकेण अन्तर्जालस्य त्रीणि स्रोतांसि समुल्लिखति।

ग) पूर्णशङ्करगौतमनामानुसन्धाता *कुलचन्द्रगौतमप्रणीताया अमरकोशटीकाया व्याकरणदृष्ट्या पर्यालोचनम् (ई.२०२५, नेपालसंस्कृतविश्वविद्यालयः)* इत्याख्ये विद्यावारिधिशोधप्रबन्धे नवत्यधिकान् सन्दर्भग्रन्थान् प्रयुङ्क्ते। तत्र नैकेषु वैद्युतोपकरणप्रयोगेषु प्रतीतेष्वपि तेषामेकस्यापि समुल्लेखं न कुरुते।

घ) मनोजघिमिरेनामानुसन्धाता *शुक्लयजुर्वेदे पारिभाषिकशब्दाः (२०७५,* त्रिभुवनविश्वविद्यालयः, नेपालः*)* नामके स्नातकोत्तरस्तरीये शोधेप्रबन्धे ऊनचत्वारिंशत् सन्दर्भान् प्रयुङ्क्ते। तत्र नैकानि डिजटलोपकरणानि प्रयुक्तानि प्रतीयन्ते परं तेभ्य एकस्यापि समुल्लेखं स तत्र न कुरुते।

ङ) योगेन्द्रकुमारनामानुसन्धाता *मृगाङ्कशतकनीतिशतकयोः सांस्कृतिकसामाजिकसाहित्यदृष्ट्या समीक्षात्मकमध्ययनम्* (ई.२०२३, केन्द्रीयसंस्कृतविश्वविद्यालयः महाराष्ट्रम्) इत्याख्ये विद्यावारिधिरनुसन्धाने संस्कृतभाषासम्बद्धान् द्वाचत्वारिंशत्, आङ्ग्लसम्बद्धान् पञ्च जालपुटसम्बद्धाँश्च द्वादशसन्दर्भान् प्रयुङ्क्ते। तत्र स मुद्रितपुस्तकानां सन्दर्भाङ्कनं ग्रन्थपद्धत्या विदधाति।

च) पुरुषोत्तममिश्रः (ई.२०२३, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी) *मीमांसाशास्त्रीयग्रन्थस्य बौद्धदर्शनसिद्धान्तानां समीक्षा* इत्याख्ये विद्यावारिधिरनुसन्धाने सम्प्रयुक्तग्रन्थसूच्यां (सन्दर्भसामग्रीसूच्याम्) द्वाचत्वारिंशद् मुद्रितग्रन्थान् ग्रन्थपद्धत्या समुल्लिखति। तत्र नैकेषु वैद्युतपुस्तकादिषु प्रयोगेषु प्रतीतेष्वपि तेभ्य एकस्याप्युल्लेखं न कुरुते।

छ) प्रकाशपौडेलनामानुसन्धाता **कौमोदकी**नाम्न्यां वार्षिकशोधपत्रिकायां (ई. २०२४, पञ्चमाङ्कः) *अभिज्ञानशाकुन्तलनाटके संवादयोजना* इति शीर्षकान्विते शोधलेखे द्वादशसन्दर्भान् प्रयुङ्क्ते। तत्र नैकेषु वैद्युतसंसाधनेषु प्रयुक्तेषु प्रतीतेष्वपि त्रयाणामेव समुल्लेखनं कुरुते।

ज) पुरुषोत्तमाचार्यनामानुसन्धाता **हैमप्रभा**नाम्न्यां वार्षिकशोधपत्रिकायां (ई.२०२२, एकविंशत्यङ्कः) *विशेषसमवायपदार्थपरिशीलनम् इति शीर्षकयुते शोधलेखे* नवसन्दर्भान् प्रयुङ्क्ते। तस्मिन् लेखे नैकेषु वैद्युतसंसाधनेषु प्रयुक्तेष्वपि लेखकः तेषामुल्लेखनं मुद्रितपुस्तकमाध्यमेनैव कुरुते।

झ) भारतदेशतः प्रकाशितासु संस्कृतभाषानिबद्धासु- संस्कृतविमर्श-निबन्धमाला-अनन्ता-गोमती-जर्नलअफ गंगानाथझाक्याम्पस-प्रज्ञा-सारस्वतीसुषमा-शोधज्योति-शोधप्रभा-शोधदृष्टि-जिज्ञासाप्रभृतिषु शोधपत्रिकासु, शोधगङ्गा इत्याख्ये वैद्युतशोधसङ्कलनकेन्द्रे निक्षिप्तेषु शोधनिबन्धेषु, नेपालतः प्रकाशितासु- हैमप्रभा-गवेषणा-शोधप्रभा-कौमोदकी-प्रभा-निष्ठा-वाल्मीकिप्रज्ञा-कालिकाप्रभाप्रभृतिषु शोधपत्रिकासु एवमेव NepJol इत्यत्र निक्षिप्तासु अन्यासु पत्रिकासु च वैद्युतसन्दर्भाङ्कनस्य प्रयोगस्थितिरत्यन्तन्यूना वर्तते, अतः सामाजिकसञ्जालसाधनेभ्यः- युट्युब-इन्स्टाग्राम-फेसबुक-एक्सप्रभृतिभ्यो वैद्युतस्रोतोभ्यः सन्दर्भसमुद्धरण-स्थितिः प्रतिशतं पञ्चसङ्ख्यातोऽपि न्यूनतरमस्तीति बुध्यते।

अत्रत्येषु (क), (ग), (घ), (च), (ज), (झ) शीर्षकसम्बद्धेषु लेखेषु अन्तर्जालपुटस्य प्रयोगसमुल्लेखनं रचयितृभिः कृतं न दृश्यते, यद्यपि तैर्गृहीतानि पुस्तकानि पिडिएफमाध्यमेन अन्यदीयजालमाध्यमेन च लब्धानि सन्तीति प्रतीयते। अतो जालतः सामग्रीषु समुद्धृतेषु तेषां सन्दर्भाङ्कनं कथं विधेयमिति विषये बहुषु निबन्धकारेषु ज्ञानं नास्ति अथवा तत्प्रयोगे जाटिल्यमनुभूय ते परम्परितरीत्यैव सन्दर्भाङ्कनं कुर्वन्तीति बुध्यते।

## वैद्युतसामग्रीणां सन्दर्भाङ्कनप्रक्रिया

### *सन्दर्भाङ्कने संस्कृतवैशिष्ट्यम्*

संस्कृतशोधार्थिनः परम्परातो द्विधा स्रोतोनिर्देशं कुर्वन्तः सन्ति- ग्रन्थपद्धत्या लेखकपद्धत्या च। ग्रन्थपद्धतिर्नाम- स्रोतस्सन्दर्भसमुल्लेखने आदौ ग्रन्थनाम-समुल्लेखनम्, यथा- श्रीमद्भगवद्गीता, पृ.१७ इति। येषु ग्रन्थेषु ग्रन्थकारा न प्राप्यन्ते अथवा येषां ग्रन्थानां प्रसिद्धिर्ग्रन्थद्वारैव जातास्ति तेषु च ग्रन्थपद्धत्या सन्दर्भाङ्कनं विधीयते। वेदानाम्, उपनिषदाम्, आरण्यकानाम्, ब्राह्मणग्रन्थानां श्रीमद्भगवद्गीतादीनाञ्च सन्दर्भाङ्कने ग्रन्थपद्धतिरेव प्रयुज्यते ज्यायान् च। अस्या उल्लेखनं गर्भटिप्पन्यां सन्दर्भसामग्रीसूच्यां च समानतया विधेयं भवति, अन्यथा सूच्यां तस्या अन्वेषणे समस्या आपतति। पादटिप्पनीप्रयोगेऽपि अनेनैव क्रमेण पादतले सूच्यां चैकरूपता साधनीया। यत्र लेखकाः समुपलभ्यन्ते तत्र तु संस्कृतशोधेष्वपि लेखकपद्धतिरेव प्रयुज्यते। अत्र तु आदौ लेखकनाम ततो ग्रन्थनामादिकं समुद्ध्रियते, यथा-गुरुप्रसादकोइराला, पृ.१७-३२ इति। शोधान्ते सूचीनिर्माणमपि आदौ लेखकनामसमुल्लेखनक्रमेणैव विधीयते। आधुनिकेषु एपिएपक्षधरा लेखकनामानन्तरं ग्रन्थप्रकाशनवर्षं समुल्लिखन्ति। एकस्यैव लेखकस्य अनेके ग्रन्था भवितुमर्हन्तीति विचार्य द्वितीयतृतीयादिषु ग्रन्थेषु पृथक्करणाय पारिवारिकनामान्ते प्रकाशनवर्षमावश्यकमिति तेषामाशयः। परं बहूनां संस्कृतशोधानां सन्दर्भसूच्यां प्रकाशनस्थानानन्तरमेव प्रकाशनवर्षं प्राप्यते, सा च परम्परा आधुनिकैरप्यनुकरणीयेति विचार्यात्र टिप्पनीनिर्माणक्रमेऽपि सैव सरणी अनुक्रियते। अतो लेखकनाम/ग्रन्थनाम इत्यस्य अनन्तरं ग्रन्थपृष्ठसङ्ख्या देया भवति, यथा-भवानीशङ्करभट्टराईः, पृ.१७-३२ इति। यदि एकस्यैव लेखकस्य बहूनि पुस्तकानि सन्ति अथवा लेखकनाम्ना एव सूच्यन्वेषणे समस्या जायते चेद् लेखकनामानन्तरं ग्रन्थस्य सङ्क्षिप्तनाम अपि तत्र लेखितुं शक्यत इति एमएलएइत्यस्य नियमोऽत्रापि अनुकर्तव्यो भवति। अतो लेखकनाममात्रेण सन्देहे समुत्पन्ने (अन्यत्र न) तेन सह सङ्क्षेपेण ग्रन्थनाम अपि तत्र योजनीयमिति विचार्य तथा योजनाय परामृश्यते।

सन्दर्भाङ्कनशब्देन सामान्यतोऽन्येषां सामग्रीणां भावशब्दादिषु गृहीतेषु तेषां स्रोतोनिर्देश (गर्भटिप्पन्यां सन्दर्भसामग्रीसूच्यां वा) इति बोधितेऽपि गर्भटिप्पन्यामेव स्रोतोभूतस्य सन्दर्भस्य समुल्लेखनमिति विशिष्टार्थोऽपि प्रसङ्गवशादवबुध्यते। अतः शोधक्षेत्रे सन्दर्भाङ्कनस्य अर्थद्वयमेव प्रसिद्धं दृश्यते। अत्र शब्दोऽयं यथावश्यकं अर्थद्वय एव प्रयुक्तो विद्यते।

प्राचीनसंस्कृतलेखेषु तस्मिन्नेव पृष्ठे सन्दर्भाङ्कनं भवति स्म परमाधुनिकैर्विरचितेषु शोधलेखेषु मूलपृष्ठे सन्दर्भसामग्रीसूच्यां चेति स्थानद्वये सन्दर्भाङ्कनं विधीयते, तेषामनुकरणं संस्कृतगवेषकैरपि विधीयमानमस्ति, अतोऽधुना संस्कृतलेखेष्वपि स्थानद्वय एव सन्दर्भाङ्कनं प्रचलतीति वैद्युतसामग्रीणां सन्दर्भाङ्कनमपि मूलपृष्ठे सन्दर्भसामग्रीसूच्यां चेति द्वयोः स्थानयोर्विधीयते। आधुनिका एपिए-एमएलएसमर्थकाः पादटिप्पनीं न प्रयुञ्जते, ते गर्भटिप्पनीमेव उपयुञ्जते। ते च पाठमध्ये कोष्ठकचिह्नेन चिह्निते स्थाने सन्दर्भकारस्य सङ्क्षिप्तं विवरणं ददति।

संस्कृतानुसन्धातारोऽपि सङ्क्षेपेण सन्दर्भलेखनीयेषु कवितासूत्रादिषु शैलीमिमां प्रयुञ्जते। यत्र सन्दर्भभूतानां दीर्घोद्धरणानां समुल्लेखनम् आवश्यकं प्रतीयेत तत्र तु संस्कृतशोधेन पादटिप्पनी एव प्रयुज्यते, अतः संस्कृतशोधस्य वैशिष्ट्यमेव पादटिप्पन्या सन्दर्भोद्धरणमिति। सन्दर्भाङ्कने पादटिप्पनीप्रयोगपरा सा शैली पूर्वोक्तात् काचिद् भिन्ना प्राचीनतरा च वर्तते। तथाविधायां पादटिप्पन्यां मूलपाठमध्ये समागतं स्रोतस्सन्दर्भमङ्केन अङ्कयित्वा तस्य अधस्तात् (पादतले) स्रोतस्सामग्री, मुख्यलेखकसम्बद्धं विवरणं च सङ्क्षेपेण प्रदीयते। अनयोर्गर्भपादयोः शैल्योः प्रयोगो वैद्युतसामग्रीणां सन्दर्भाङ्कनेऽपि स्वाभाविकतया जायत इति वैद्युतसामग्रीणां सन्दर्भाङ्कनप्रसङ्गे वैद्युतसामग्रीतो गर्भटिप्पनीनिर्माणप्रक्रिया तथा वैद्युतसामग्रीतः पादटिप्पनीनिर्माणप्रक्रियापि स्वत आयातीति वैद्युतसामग्रीणां सन्दर्भाङ्कने टिप्पनीद्वयमेव संस्कृतेनापि ऊररीक्रियते। अतः संस्कृतशोधार्थं पूर्वोक्तस्य प्रक्रियात्रयस्यैव आवश्यकता यथास्थानं वरीवर्तीति तेषां सर्वेषां चर्चा अत्र क्रमश उदाहरणमुखेन विधीयते।

## सन्दर्भाङ्कनस्याधारभूता नियमाः

गर्भटिप्पनीविषये, पादटिप्पनीविषये सन्दर्भसामग्रीसूचीनिर्माणविषये च आधुनिकीषु शैलीपुस्तिकासु अनेकविधानि मतानि प्राप्यन्ते। विशेषत एपिए- म्यानुअल (7th ed. 2020) तथा एमएलए म्यानुअल (9th ed. 2021) नेपालदेशस्थे संस्कृतनिकाये बहुत्र प्रयुज्यत इति हेतोस्तेन कारणेन संस्कृतवाङ्मये सुदीर्घपरम्परातो प्रयुज्यमानान् सन्दर्भाङ्कनप्रयोगान् संस्कृतशोधपद्धतिसम्बद्धान् पूर्वग्रन्थाँश्च आश्रित्य गर्भटिप्पनीविषये, पादटिप्पनीविषये सन्दर्भसामग्रीसूचीनिर्माणविषये च केचन नियमाः प्रस्ताव्यन्ते।

संस्कृतशोधेषु कुत्र गर्भटिप्पनी कुत्र च पादटिप्पनी प्रयोक्तव्येति विषये प्राचीनशोधग्रन्थेषु कापि स्पष्टा नीतिर्न दृश्यते तथापि प्राय उद्धर्तारो लघुषु सूत्रश्लोकादिषु तत्रैव (गर्भे/ पाठमध्य एव) सङ्क्षेपेण सन्दर्भस्रोतः समुल्लिखन्ति, यथा- वृद्धिरादैच् (पा.सू.१-१-१), धर्मक्षेत्रे कुरुक्षेत्रे... (गीता १-१) इत्यादि। अत्र कियति आकारे गर्भस्य कियति च पादस्य प्रयोग उपयुज्येत इत्यत्र संस्कृतलेखकेषु मतैक्यं नास्ति। परमाधुनिका एपिएसमर्थका एमएलएसमर्थकास्तु पाठमध्ये स्रोतस्समुल्लेखनार्थम्, पृथगनुच्छेदे स्रोतस्समुल्लेखनार्थञ्च शब्दसीमां पङ्क्तिसीमां च निर्धारयन्ति। अत्र एपिएपक्षधरा ऊनचत्वारिंशत्शब्दपर्यन्तकेऽनुच्छेदे पाठमध्य एव स्रोतस्समुल्लेखनाय तस्मादधिकेषु सत्सु तु भिन्नानुच्छेदे लेखनाय निर्दिशन्ति। तथैवोद्धरणस्यान्ते सन्दर्भलेखकस्य पारिवारिकनामादि-समुल्लेखनपरकं कोष्ठकीयं सन्दर्भाङ्कनम् (Parenthetical citation) इति प्रयोगाय समुपदिशन्ति। अपरे एमएलएपक्षधरास्तु यदि उद्धृतांशः गद्यम् (Prose) अस्ति चेत् चतसृभ्यः पङ्क्तिभ्यो दीर्घेष्वनुच्छेदेषु दीर्घोद्धरण- (Block quotation) द्वारा तान् समुल्लेखनार्थम्, कविता (Poetry) वर्तते चेत् तु पङ्क्तित्रयादधिकासु सतीषु भिन्नानुच्छेदेन च लेखनार्थं नियमं निर्धारयन्ति। अत्र संस्कृतपक्षधरेषु ऐक्येषु अभावेष्वपि पाठमध्य एव दीर्घेषु स्रोतस्सु प्रयुक्तेषु लेखकीयभावधारा विच्छिद्यते, दीर्घोद्धरणभारजन्यो दोषोऽपि आपततीति संस्कृतशोधार्थमपि गर्भपादटिप्पन्योः प्रयोगसीमा निर्धार्यते, एवम् -

क) द्विपङ्क्तियुता ततो दीर्घा वा कविता, तत्समानः ततो लम्बोऽनुच्छेदो वा दीर्घानुच्छेदो मन्तव्यः, स च दीर्घानुच्छेद-(Block quotation) द्वारा उद्धरणीयः। दीर्घानुच्छेदस्य गर्भमध्ये निर्धारणसीमा अष्टौ पङ्क्तिर्वर्तते।

ख) दीर्घानुच्छेदे समुद्धृता कविता पृष्ठतलस्य मध्यभागः (Center) इत्यत्र लेखनीया।

ग) दीर्घानुच्छेदे समुद्धृतोंऽशो यदि गद्यमस्ति चेद् दीर्घानुच्छेद- (Block quotation) इत्यस्य नियमानुसारेण चतुरक्षरमाभ्यन्तरम् (Indent) कृत्वा आरम्भणीयम्, तत्र वक्राक्षरम् (Italic) स्थूलाक्षरम् (Bold) च न विधेयम्।

घ) उद्धरणान्ते कोष्ठकीयं सन्दर्भाङ्कनम् (Parenthetical citation) इत्यस्य नियमानुसारं स्रोतःसमुल्लेखनीयम्।

ङ) उद्धरणीयांशः (कविता वा अनुच्छेदः) एकपङ्क्तियुतो वर्तते चेत् कोष्ठकीयेन समाख्यानात्मकेन वा सन्दर्भाङ्कननियमेन पाठमध्य एव समुल्लेखनीयः।

च) पूर्वोक्तपङ्क्तिसीमा- (क इत्यत्र समुल्लिखिता पङ्क्तिसीमा) तो दीर्घतरासु कवितासु च सतीसु पादटिप्पन्यां मूलसन्दर्भं समुल्लिख्य तस्याः सन्दर्भाङ्कनमपि तत्रैव विधाय तस्या भाव एव मूल आहरणीयः।

## वैद्युतसामग्रीतो गर्भटिप्पनीनिर्माणप्रक्रिया

विद्युत्पुस्तक-जालनिक्षिप्तशोधपत्रिका-शोधसङ्ग्रहालय-सामाजिकजालपुट- शैक्षिकजालपुट-प्रभृतिभ्यो वैद्युत- स्रोतोभ्यः सन्दर्भोद्धरणेऽपि पुस्तकसमानैव सन्दर्भाङ्कनशैली। तत्र पुस्तकाश्रयेषु कोष्ठकीयेषु सन्दर्भाङ्कनेषु सत्सु आदौ स्रोतस्समुद्धरणं भवति, ततः कोष्ठके लेखकनाम, पृ. (पृष्ठस्य सङ्क्षेपः) पृष्ठाङ्कश्च लिख्यते, तत्र पुस्तकादीनां विवरणं नायाति, यदि लेखकः पुस्तकनाम समुद्धर्तुमिच्छिति चेद् नामानन्तरं कृतेर्नाम अपि लेखितुं शक्नोति परं तत्र अनिवार्यता नास्ति। परं एकस्यैव लेखकस्य बहुभ्यः पुस्तकेभ्यः नैकेषु सन्दर्भेषु समुद्धृतेषु कस्मात् पुस्तकाद् गृहीतमिदमुद्धरणमिति ज्ञानाय पुस्तक/सामग्रीप्रकाशकनाम अनिवार्येण लेख्यम्। सन्दर्भाङ्कने पुस्तकनामसु सामग्रीनामसु वा समुद्धृतेषु तत्र वक्राक्षरादिकं नावश्यकम्। एतासां सामग्रीणां क्रमो निम्नानुसारं विद्यते-

क) स्रोतस्समुद्धरणम् (सति आवश्यके),

ख) लेखकनाम (प्रथमनाम, मध्यमनाम, पारिवारिकं नाम),

ग) सति आवश्यके सामग्रीनाम तत्प्रकाशको वा,

घ) पृ. (पृष्ठशब्दस्य सङ्क्षिप्तं रूपम्)

ङ) पृष्ठाङ्काः।

कोष्ठकीयमुदाहरणम्, यथा-

क) प्राच्यविद्याक्षेत्रेऽनुसन्धानाय विमर्शात्मकमध्ययनम्, समीक्षात्मकमध्ययनम्, तुलनात्मकमध्ययनम्, विशिष्टमध्ययनम्, विश्लेषणात्मकमध्ययनम्, व्याख्यात्मकमध्ययनं तथा समीक्षात्मकं सम्पादनमित्यादयः शीर्षकभागा भवन्ति (विरूपाक्षजड्डीपालः, पृ.५)।

ख) शोधप्रबन्ध-शोधपत्रयोः सामान्यभेदो यद्- बृहदाकारकः सकलाङ्गविभूषितो ग्रन्थकेन्द्रितः शोधः शोधप्रबन्ध इत्युच्यते। यदि किमपि विषयवस्तु तथ्यं समस्यां वाश्रित्य ग्रन्थनिरपेक्षत्वेन शोधो विधीयते चेत् तत् शोधपत्रमिति कथ्यते (अभिराजराजेन्द्रमिश्रः, शोधप्रविधि एवम् पाण्डुलिपिविज्ञान, पृ.२६)।

समाख्यानात्मकेषु सन्दर्भाङ्कनेषु लेखकसम्बद्धाः कृतिसम्बद्धाश्च सूचनाः पाठमध्य एव समुल्लिख्यन्ते। कदाचिद् लेखककृतिनाम्नोर्मध्ये एकमेव सूचनं भवितुमपि शक्नोति। अथवा प्रकाशकेन प्रकाशिता सूचना भवितुमपि शक्नोति, तस्माद् स्रोतसि गृहीते पाठमध्ये ग्रन्थकारो ग्रन्थः प्रकाशको वा उत्पादकोऽपि भवितुमर्हति। तच्च मूलपाठस्याङ्गं भवति। ततो मूलोद्धरणं प्रत्यक्षेणाप्रत्यक्षेण वा विधीयते। तदन्ते च कोष्ठकमध्ये पृष्ठसङ्ख्या (अस्ति चेत्) समुल्लिख्यते, अतोऽत्रापि पुस्तकवैद्युतसंसाधनयोः सन्दर्भाङ्कने समाना स्थितिर्दृश्यते, उदाहरणं यथा-

भारतीयोऽनुसन्धाता नगेन्द्रः अनुसन्धानस्य प्रविधिप्रक्रियानामके प्रविधिपुस्तकेऽनुसन्धाने मौलिकतामहत्त्वं प्रतिपादयन् प्राह- मौलिकताऽनुसन्धानस्य प्राणायितं तत्त्वमस्ति। परन्त्वेतस्य स्वरूपं विषयसापेक्षं भवति (पृ.१३)।

केचन अनुसन्धातारो गर्भटिप्पनीमध्य एव सामग्रीप्रकाशनदिनाङ्कानपि लेखितुमिच्छन्ति परं सन्दर्भाङ्कनप्रक्रियायां विविधता न भवेदिति हेतोरत्र दिनाङ्कादिलेखनं विनैव गर्भटिप्पनीनिर्माणार्थमत्र प्रस्तावः प्रस्तूयते। अत्र गर्भटिप्पनीनां कानिचन निदर्शनानि क्रमशः प्रस्तूयन्ते।

*क) पुस्तकाद् गृहीताया गर्भटिप्पन्याः कोष्ठकीयं निदर्शनम्*

अष्टाध्याय्याः सामान्यप्रक्रियावबोधाय प्रक्रियाक्रमेण अध्यापयन् शिक्षकः तत्तत्स्थलानां सूत्राणि वृत्वा अष्टाध्याय्याः अध्याय-पाद-सूत्रसङ्ख्या एव लेखनेन अभ्यासयेत् (हरिप्रसादशर्माचार्यः, पृ.भूमिकायां म)।

*ख) मुखपुस्तिका (Facebook) पृष्ठतो गृहीताया गर्भटिप्पन्या कोष्ठकीयं निदर्शनम्*

कतिपये लेखका नेपालीतद्भवशब्देष्वपि तत्समनियममोहं दर्शयन्ति (हेमाङ्ग अधिकारी, फेसबुक)

ग) पुस्तकादुद्धृते कोष्ठकीयसन्दर्भाङ्कने (एकस्यैव लेखकस्य बहुषु पुस्तकेषु सत्सु) -

विश्वविद्यालयेन निर्धारितविधानानुसारेण विधीयमानेऽनुसन्धाने त्रीणि तत्त्वानि भवन्ति- अनुपलब्धानां तथ्यानामन्वेषणम्, उपलब्धतथ्यानां सिद्धान्तानां वा पुनर्व्याख्यानम्, ज्ञानक्षेत्रस्य सीमाविस्तारोऽर्थाद् मौलिकताप्रतिपादनञ्चेति (नगेन्द्रः, अनुसन्धानमालोचना च, पृ.९०)।

घ) पुस्तकादुद्धृते समाख्यानात्मकसन्दर्भाङ्कने (एकस्यैव लेखकस्य बहुषु पुस्तकेषु समुद्धृतेषु)

अ) आचार्यो भट्टोजिदीक्षितः प्रौढमनोरमाग्रन्थे हल् इति माहेश्वरसूत्रं व्याख्यायन् प्राह- हस्य ल् इति च व्याख्यायते। सामीप्यं षष्ठ्यर्थः। यद्वा मास्तु तन्त्रादि, आद्ये समासस्य क्लिष्टत्वात् ... (पृ.१७-१९)।

आ) आचार्यो भट्टोजिदीक्षितः सिद्धान्तकौमुदीग्रन्थेऽसरूपापवादप्रत्ययं व्याख्यायन् प्राह- अस्मिन् धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना (पृ.२-३)।

ङ) पुस्तकादुद्धृते कोष्ठकीयसन्दर्भाङ्कने (एकस्माद् लेखकादेकस्यैव पुस्तकस्य समुद्धरणे)-

शोधानुसन्धानगवेषणासु शाब्दिकस्तरेऽपि महत् पार्थक्यमस्ति (प्रभुनाथद्विवेदी, संस्कृतशोधप्रविधिः, पृ.१)

च) पुस्तकादुद्धृते समाख्यानात्मकसन्दर्भाङ्कने (एकस्माद् लेखकादेकस्यैव पुस्तकस्य समुद्धरणे)-

शालिग्रामसुवेदीनामा व्याख्याता वैदिकप्रक्रियाया महत्त्वं विशदयन् *स्वरवैदिकीप्रक्रिया*नामके पुस्तके प्राह- वेदेषु लौकिकाद् व्यतिरिक्ता नैके शब्दाः प्राप्यन्ते। तेषां बोधाय व्याख्यानाय च स्वरवैदिकीप्रक्रियाया ज्ञानं नितान्तमावश्यकम् (पृ.५०)।

डिजिटलोपकरणाद् वैद्युतपरिचयसङ्केत-(DOI- Digital object Identifier) युतेभ्यः फेसबुक-इन्स्टाग्राम-एक्स-युट्युबप्रभृतिभ्यः संसाधनेभ्यः सामग्रीषु समुद्धृतासु गर्भटिप्पन्यां वैद्युतपरिचयसङ्केतो न स्थाप्यते। संस्कृतपक्षधरा दिनाङ्कमपि न लिखन्तीति एमएलएशैल्या सहास्य स्वभावो बहुधा मिलति। परं संस्कृते एमएलएशैलीतोऽपि वैशिष्ट्यमस्ति यद् नामलेखने आदिनाम, मध्यनाम पारिवारिकं नाम चेति नामत्रयमेव समुल्लिख्यते, अतोऽनेनैव प्रकारेण गर्भटिप्पनीनिर्माणाय अत्रापि प्रस्ताव्यते-

क) कोष्ठकीयसन्दर्भाङ्कनम् (गर्भटिप्पन्याम्)

भवानीशङ्करभट्टराईमहोदयस्य- मास्कं धर अरे मित्र मास्कं धारय...इत्यादि कोरोनासचेतनागीतं मानवान् मास्कधारणार्थं तन्माध्यमेन स्वास्थरक्षणार्थञ्च प्रेरयति (कृष्णहरिबरालः, संस्कृतसरसीनामके युट्युबमध्ये)।

ख) समाख्यानात्मकं सन्दर्भाङ्कनम् (गर्भटिप्पन्याम्)

भवानीशङ्करभट्टराईमहोदयेन प्रकाशितं मास्कं धर अरे मित्र इत्यादि कोरोनासचेतानगीतं प्रति भाषमाणः कृष्णहरिबरालः प्राह- गीतमिदं मानवान् मास्कधारणार्थं तन्माध्यमेन स्वास्थरक्षणार्थञ्च प्रेरयति (संस्कृतसरसी-युट्युब च्यानल)।

## *जालपुटे निक्षिप्ताभ्यः शोधपत्रिकाभ्यः सन्दर्भाङ्कनप्रक्रिया*

साम्प्रतं विश्वविद्यालयतः शोधसंस्थानतोऽन्यशैक्षिकनिकायतश्च प्रकाशिताः शोधसम्बद्धाः बहुशः शोधपत्रिकाः (Journals) शोधसंस्थाननिर्मिते, विश्वविद्यालयनिर्मिते, प्रकाशनसंस्थाननिर्मिते सर्वकारनिर्मिते वा जालपुट- (Website) इत्यत्र निक्षिप्यन्ते। वैद्युतमाध्यमाद् विश्वस्तरीयेषु पाठकेषु प्रेषणसौलभ्येन, यस्मात् कस्मादपि स्थानात् अध्ययनटिप्पनादिसौलभ्येन, न्यूनधनव्ययेन प्रकाशनसम्भवेन चाधुना बहवः प्रकाशका अत्राकर्षिताः प्राप्यन्ते। एतद्विधाः शोधपत्रिका यस्मिन् कस्मिन्नपि देशे स्थितेषु सर्वकारीयेषु नैजेषु वा सङ्ग्राहकभाण्डागारेषु जालमाध्यमेन निक्षिप्यन्ते। स भाण्डागारोऽपि स्वं विश्वस्तरीये इतोऽपि विशालतरे भाण्डागारे संयोजयतीति जालपुटमध्ये प्रेषितो लेखः तन्माध्यमेन विश्वस्तरीये वैद्युतपुस्तकालये प्राप्नोति। नेपालदेशे त्रिभुवनविश्वविद्यालयान्तर्गतः केन्द्रीयपुस्तकालयः

(अनलाइन डेटावेस/पोर्टल नेप्जोलः (NepJol-Nepal Journals Online) इति सेवामिमां प्रददाति। असौ स्वकीये जालपुटे प्राप्ताः सामग्रीः बेलायतदेशतः प्रकाशयति। त्रिभुवनविश्वविद्यालयस्थकेन्द्रीयपुस्तकालयेन स्थापिता सञ्चालितश्चेयं सेवाप्रणाली नेपालतः प्रकाशिताः ५०० सङ्ख्यातोऽधिकाः शोधपत्रिकाः सङ्गृह्य Ubiquity press UK इत्यत्र संयोजयति प्रकाशयति च। एतावन्त्यः सेवाप्रणाल्यो भारतेऽपि अनेकाः सन्ति। निःशुल्केन सामग्रीलभ्येषु भारतीयेषु नैकेषु तथाविधेषु सेवाप्रदायकेषु IndiaJOL इत्यपि एकः। सोऽपि अनेनैव प्रकारेण प्राप्तान् शोधनिबन्धान् प्रकाशयति सङ्कलयति च।

एतद्विधासु शोधपत्रिकासु निक्षिप्तेभ्यः शोधनिबन्धेभ्यः केचन वैद्युतसङ्केत- (DOI) युक्ता भवन्ति चेत् कति तु तद्रहिता अपि दृश्यन्ते। तत्रस्थितेभ्यां द्विविधाभ्यामेव शोधनिबन्धाभ्यां आवश्यकसामग्रीसमुद्धरणे एका निश्चिता प्रक्रिया अवलम्बनीया भवति, तथाविधानां सामग्रीणां सन्दर्भाङ्कनेऽवलम्बनीयाः प्रक्रियाः क्रमशोऽत्र प्रस्ताव्यन्ते-

क) कोष्ठकीयसन्दर्भाङ्कने

शरीरशब्दोऽयं वेदमनुष्यपशुवृक्षादिषु रूढिर्वर्तते (जयकान्तसिंहशर्मा, *शरीरलक्षणसमीक्षा*, पृ.१)।

ख) समाख्यानात्मकसन्दर्भाङ्कने

जयकान्तसिंहशर्मा शरीरलक्षणं समीक्षमाणः 'शरीरलक्षणसमीक्षा' इत्याख्ये शोधनिबन्धे प्राह- शरीरशब्दोऽयं वेदमनुष्यपशुवृक्षादिषु रूढिर्वर्तते (पृ.१)।

अनेनैव प्रकारेण विभिन्नेभ्यः डिजिटलोपकरणेभ्यः (यथा- शोधसङ्ग्रहालयः- Digital repositories library, सामाजिकजालपुटम्- Social network, जालनिक्षिप्तशोधपत्रिका- e-journal, शैक्षिकवेबसाइटः- Educational website इत्यादिभ्यः) प्राप्ताः सामग्रीः पूर्वोक्तप्रकारेण गर्भमध्ये प्रयोक्तुं प्रस्ताव्यते।

## वैद्युतसामग्रीतः पादटिप्पनीनिर्माणप्रक्रिया

पादटिप्पनी नाम- तस्यैव पृष्ठस्याधोभागे विन्यस्तं विशेषव्याख्यानम्, स्पष्टीकरणम्, टीकनम्, सूचनं विवरणादिकं वा। सा च टिप्पनी मूलपाठस्याधस्ताद् अङ्केन अङ्कयित्वा प्रदीयते। पादटिप्पन्याः प्रयोगेणैव संस्कृतसन्दर्भाङ्कनमन्याभ्य आधुनिकशैलीभ्यो भिन्नं प्रतिभातीति पादटिप्पनीप्रयोगः संस्कृतशोधस्य विशिष्टा सम्पत्तिः। वेदेषु तद्व्याख्यानग्रन्थेषु च मूलस्थविषयव्याख्यानाय, स्पष्टीकरणाय च टिप्पन्याः प्रयोगो भवति स्मेति सायणमहीधरोव्वटादीनां व्याख्यानावलोकनेन ज्ञायते। तामेव शैलीमनुकृत्य लौकिकेषु निघण्टु-ब्रह्मसूत्रभाष्य-वाक्यपदीय-धर्मसिन्धु-निर्णयसिन्धु-सिद्धान्तकौमुदी-काव्यप्रकाश-काव्यमीमांसा-रसगङ्गाधर- वैयाकरणसिद्धान्त-मञ्जूषाप्रभृतिषु ग्रन्थेषु, एतन्मध्ये रचितेषु नैकेषु शोधनिबन्धेषु, धर्मशास्त्र-साहित्य-व्याकरणेतिहासादिसम्बद्धेषु ग्रन्थेषु, निबन्धादिषु चोपर्युक्तार्थे पादटिप्पन्याः प्रयोगो यत्र तत्र प्राप्यते। अधुनापि युरोप-अमेरिकादिदेशस्थेभ्यो विभिन्नेभ्यो विश्वविद्यालयेभ्यः संस्कृतवाङ्मयविषये देवनागरीलिप्यां लिप्यन्तरे वा प्रकाशितेषु शोधनिबन्धेषु प्रायशः पादटिप्पनी

प्रयुज्यमाना दृश्यते (सेन, ई.२०१९,पृ.३, राजपूतः ई.२०२१,पृ.८)। अतोऽत्रत्या पादटिप्पनीप्रयोगपरा सरणी वैदेशिकैरपि स्वीकृतेति निश्चीयते। परम् एपिएपक्षधरा एमएलएपक्षधराश्च विद्वाँन्सः सन्दर्भाङ्कने पादटिप्पनीप्रयोगपरां शैलीं न स्वीकुर्वते। तत्र एपिएपक्षधरा लेखकस्याधिकेषु विवरणेषु दातव्येषु स्थानेषु, प्रतिलिप्यधिकारसम्बद्धेषु विवरणेषु च पादटिप्पनीप्रयोगं पुरस्कुर्वन्ति (एपिए म्यानुअल,२०२०,२.१२)। अत्र एमएलएपक्षधरास्तु पादटिप्पनीप्रयोगे एपिएपक्षतः किञ्चित् सरलतराः प्रतीयन्ते। ते पाठमध्ये भारकारिणां परमवश्यमुद्धरणीयानां समुद्धरणानां समुल्लेखनाय, तथ्यप्रमाणानां व्याख्यानाय, वैयक्तिकविवरणप्रस्तुतये च केषुचित् स्थानेषु पादटिप्पनीप्रयोगं पुरस्कुर्वन्ति (एमएलए म्यानुअल,२०२१,६.१)। एतावतीषु अनुमतिषु सतीष्वपि प्राय उद्धर्तार आधुनिकेषु शोधलेखेषु पादटिप्पनीं न प्रयुञ्जत इति आधुनिकेषु शोधनिबन्धेषु अस्याः प्रयोगस्थितिः शून्यसमानेव प्रतीयते। आधुनिकेष्वपि सिकागोपक्षधरास्तु संस्कृताय भाषासाहित्याय च पादटिप्पनी आवश्यकीति विचार्य पादटिप्पनी-सन्दर्भसूचीप्रणाली (Notes and Bibliography System) अन्तर्गतं पादटिप्पनीमपि अनुमोदयन्ति (सिकागो म्यानुअल,२०१७,१४)।

संस्कृतशोधेषु प्रयुज्यमानायां पादटिप्पन्यां कानि कानि चाङ्गानि निर्धारणीयानीति विचारिते गर्भटिप्पन्यां यानि यानि सन्ति तानि तान्येव अङ्गानि तत्समानया रीत्या पादटिप्पन्यामपि निर्धारणीयानीति वक्तुमुचितं भवति। तथाकृते सति अनुसन्धातारः तत्प्रयोगे सन्देहभाजो न भविष्यन्तीति सरलतार्थमेकरूपतार्थञ्च उपरि स्थितान्यङ्गानि पूर्वोक्तक्रमेणैवात्रापि प्रयोक्तव्यानीति परामृश्यते, अनेन क्रमेण-

क) उद्धरणम् (सति आवश्यके),

ख) लेखकनाम (प्रथमनाम, मध्यमनाम, पारिवारिकं नाम),

ग) पृ. (पृष्ठशब्दस्य सङ्क्षिप्तं रूपम्)

घ) पृष्ठाङ्काः।

**अप्रत्यक्षोद्धरणस्योदाहरणम्**

वेदार्थज्ञानाय लौकिकशब्दानामपि वैदिकशब्दानामपि ज्ञानमत्यन्तमावश्यकं भवतीति विद्वद्भिरुच्यते।[१]

**प्रत्यक्षोद्धरणस्योदाहरणम्**

वेदार्थज्ञानाय लौकिकवैदिकयोरुभयविधयोः शब्दयोर्ज्ञानमावश्यकं भवति।[२]

---

१.वेदार्थज्ञानाय लौकिकवैदिकयोरुभयविधयोः शब्दयोर्ज्ञानमावश्यकं भवति, शालिग्रामसुवेदी, पृ.भूमिका ञ।

२.शालिग्रामसुवेदी,पृ.भूमिका ञ।

**वैद्युतोपकरणेभ्यः सामग्रीषु समुद्धृतासु-**

क) उद्धरणम् (उद्धरणेषु विद्यमानेषु)

ख) लेखकनाम (प्रथमनाम, मध्यमनाम, पारिवारिकं नाम),

ग) सति आवश्यके सामग्रीनिर्मातुर्नाम प्रकाशकनाम वा,

**अप्रत्यक्षोद्धरणस्योदाहरणम्-**

भारतीयज्ञानपरम्पराया आरम्भः तस्या मीमांसाक्रमश्च दशसहस्रवत्सरपूर्वात् प्रारभ्य तस्याः क्रमिकविकासश्च पञ्चसु चरणेषु जात इति विद्वद्भिरनुसन्धीयते।[१]

**प्रत्यक्षोद्धरणस्योदाहरणम्-**

भारतीयो विद्वान् एकस्मिन् प्रवचने प्राह- "भारतीयज्ञानपरम्परायाः आरम्भः तस्य मीमांसाक्रमश्च दशसहस्रवत्सरपूर्वाद् अभूत्, तस्याः क्रमिकविकासश्च पञ्चसु चरणेषु जात इत्यनुसन्धीयते।"[२]

१.भारतीयज्ञानपरम्परायाः आरम्भः तस्या मीमांसाक्रमश्च दशसहस्रवत्सरपूर्वाद् अभूत्, तस्याः क्रमिकविकासश्च पञ्चसु चरणेषु जात इत्यनुमीयते, राधावल्लभत्रिपाठी, युट्युब।

२.राधावल्लभत्रिपाठी, युट्युब।

## वैद्युतसामग्रीतः सन्दर्भसामग्रीसूचीनिर्माणप्रक्रिया

प्राचीनेषु संस्कृतशोधनिबन्धेषु सन्दर्भसामग्रीसूची न प्रयुज्यते स्मेति द्वि-त्रि-शतवर्षप्राक्तनानां शोधनिबन्धानामवलोकनेन ज्ञायते। तात्कालिका अनुसन्धातार उद्धरणीयं विषयं क्वचित् प्रत्यक्षेण क्वचिच्चाप्रत्यक्षेण गृह्णन्ति स्म। तेषां प्रत्यक्षोद्धरणे क्वचिद् ग्रन्थनाम क्वचिच्च ग्रन्थकारनाम भवति स्म। अप्रत्यक्षे तु तानि तानि स्थलानि लेखकसङ्केतं विनैव (ग्रन्थस्य ग्रन्थकारस्य वा) गृह्णन्ति स्म। तथाविधानामुद्धरणानां स्थलनिर्देशनं न तु मूले नापि पादटिप्पन्यादौ विधीयते स्म। तस्य मूलेषु आवश्यकेषु सत्सु उद्धर्तारो मूलग्रन्थान् अन्विष्य समग्रमधीयते स्म। तदानीं सूचनासञ्चारादीनां पारस्परिकसम्पर्काभावेन भाषान्तरीयाणां विषयान्तरीयाणां तत्रत्यानां विधिप्रविधीनाञ्च पारस्परिकी तुलना च सामान्यतयैव भवति स्म परमधुनातनीयेषु शोधेषु स्थानीयप्रभावेण, कालिकप्रभावेण, समानान्तरशैक्षिकनिकायप्रभावेण च विश्वविद्यालयान्तरीयाः भाषान्तरीयाश्च शोधाः परस्परं तोल्यन्ते तेषां नैयून्यं वैशिष्ट्यं वा तत्क्षणमेव प्रकाशयिष्यते। अतो लेखकैरपि पारस्परिकसम्पर्कमन्तरा किमपि विधातुं न पार्यत इति हेतोराधुनिकानां प्रभावेण संस्कृतशोधनिबन्धेष्वपि सन्दर्भसामग्रीसूचीप्रयोगपरम्परा प्रतिष्ठिता। अस्मिन् कर्मणि आधुनिकानां शैलीपुस्तकानां प्रभावः स्पष्टतया परिलक्ष्यते।

वैद्युतसामग्रीतः सन्दर्भोद्धृतायां तेषां स्थलनिर्देशः कथं विधेय इति जिज्ञासायां मूलतो द्विविधा सरणिः प्रस्ताव्यते। तत्र प्रथमा-परम्परितसन्दर्भोल्लेखनेन अन्तर्जालसङ्केतलेखनपरा, द्वितीया च पृथक् पृथक् स्थानेषु सन्दर्भोल्लेखनपरा। भारतस्थात् केन्द्रीयसंस्कृतविश्वविद्यालयात् प्रकाशितायां 'संस्कृतविमर्शः' इत्याख्यायां

शोधपत्रिकायां प्रकाशितेषु बहुषु शोधनिबन्धेषु, भारतदेशादेव प्रकाशितासु- गोमती-जाह्नवी-शोधप्रभा- शोधज्योति-शोधदृष्टि-अनन्ता-निबन्धमाला-प्रज्ञाप्रभृतिषु शतशः पत्रिकासु, तत्र सङ्गृहीतेषु शोधलेखेषु च अन्तर्जालीयाः सूच्यः, सहायकग्रन्थसूच्यश्च भिन्नभिन्नेषु क्रमेषु उट्टङ्किता दृश्यन्ते। परं नेपालदेशतः प्रकाशितेषु शोधनिबन्धेषु तु आङ्ग्ल-नेपाल्यादीनां भाषासाहित्यानां प्रभावेण स्यात् अथवा त्रिभुवनविश्वविद्यालयस्य प्रभावेण वा भवेत् सन्दर्भोद्धरणे पारम्परिकीनां सूचीनामन्ते अन्तर्जालसम्बद्धः https:/DOI इत्यादिसङ्केतः समुल्लिखितो दृश्यते। भिन्नभिन्नेभ्यः स्थानेभ्यो देशेभ्यः शैक्षिकसंस्थानेभ्यश्च प्रकातिशेषु नियमेषु आचारेषु च क उत्तमः ? कश्च गर्ह्य इति नियमाभावेन परम्परितरीत्या सन्दर्भस्रोतस्समुल्लिख्य तदन्ते अन्तर्जालसङ्केतलेखनपरां सूचीमेव समुपयुक्तां मत्वा भाविशोधार्थमपि सैव सरणिः प्रस्ताव्यते।

सन्दर्भसामग्रीसूच्यां आधुनिका लेखकनाम-ग्रन्थनाम-ग्रन्थप्रकाशक-प्रकाशनदिनाङ्काँश्चेति चत्वारि अङ्गानि प्रयुज्जते। यद्यपि एपिए-एमएलए-सिकागोशैलीषु तत्रत्यानामङ्गानां मध्ये दिनाङ्कानां क्वचिद् अग्रता क्वचिच्च पश्चता वर्तते। स्वं लेखकमितिपद्धतेरनुकर्तारं मन्यमाना एपिएपक्षधरा लेखकाद्-दिनाङ्कं प्रयुञ्जते चेत् स्वं लेखकग्रन्थपद्धतेरनुकर्तारं मन्यमाना एमएलएपक्षधराः, सिकागोपक्षधरास्तथा संस्कृतपक्षधरास्तु सर्वान्ते दिनाङ्कान् समुल्लिखन्तीति अङ्गचतुष्टयस्वीकृतिपूर्वकं सर्वान्ते दिनाङ्कसमुल्लेखनपरकमभिमतमेव अत्रापि स्वीक्रियते तदेवात्रापि प्रस्ताव्यते च। तथैव आधुनिकाः प्रायः सर्वे सन्दर्भसामग्रीसूचीषु प्रकाशनस्थानं (Place of publication) न लिखन्ति। वैद्युतसामग्रीषु प्रकाशनस्थानानि नावश्यकानीति तेषामभिमतम्। अत्र एमएलएपक्षधाराः १६०० इसावत्सरपूर्वं रचितेषु ग्रन्थेषु, जालमध्येऽलभ्यमानासु दुर्लभासु च प्राचीनसामग्रीषु स्थानं लेखितुं शक्यत इति निर्दिशन्ति (MLA, 8/9 Chapter- Work cited: Core elements). सिकागोपक्षधरा अपि निश्चितेषु केषुचित् स्थानेषु स्थानलेखनाय समुपदिशन्ति (Chicago, Chapter-14: Notes and Bibliography, section 1430-1433). परं सकलानां संस्कृतसामग्रीणामुपलब्धता अद्यावधि जालमध्ये जाता नास्ति, उद्धर्तारः प्रकाशनस्थानं लेखन्तश्च सन्तीति हेतोः संस्कृतसन्दर्भसामग्रीसूचीषु प्रकाशनस्थानमवश्यं लेखनीयं भवतीति तदनुसारमेवात्रापि प्रस्ताव्यते।

संस्कृते ग्रन्थपद्धतिः लेखकपद्धतिश्च समानतया चलन्ती दृश्यते, अतः सूचीनिर्माणक्रमे पद्धतिद्वयमपि स्वीकार्यं भवति। परं सूच्यां ग्रन्थपद्धत्या ग्रन्थकारपद्धत्या च समुट्टङ्कितानां कृतीनां विवरणं भिन्नभिन्नेषु स्थानेषु दातव्यं भवतीति भाविशोधार्थं जिज्ञासुभ्यः सैव सरणी प्रस्ताव्यते।

पत्रिकायां URL/https/DOI उल्लिखिते स्थाने एपिएपक्षधरा एमएलएपक्षधराश्च प्रकाशकं प्रकाशनस्थानं च कदापि न लिखन्ति। यतो हि तेषां तर्को वर्तते-अन्तर्जालमध्ये हि तेषां सकलं विवरणं प्राप्यते चेदत्र पुनर्लेखनं भारायैव भवतीति। इमं च तर्कमाश्रित्य सूचीषु अन्तर्जालसङ्केतयुक्तानां सामग्रीणां प्रवेशक्रमे प्रकाशकं प्रकाशनस्थानं च न लेखनीयमिति संस्कृतानुसन्धातृभ्यः प्रस्ताव्यते। अनन्तरञ्च- एमएलएपक्षधराः पत्रिकाभ्यो गर्भटिप्पनीनिर्माणे सन्दर्भस्रोतसः पृष्ठसङ्ख्यां लिखित्वा सन्दर्भसामग्रीसूच्यामपि पुनर्लिखन्ति। संस्कृतशोधेषु गर्भटिप्पन्यां पादटिप्पन्यां वा

पृष्ठसङ्ख्या/अध्यायपादसङ्ख्या लिख्यत इति हेतोः पुनर्लेखनं नावश्यकमिति मत्वा सूच्यां तन्न लेखनीयमिति निषिध्यते।

प्रकाशनस्थानं प्रकाशकं च कस्यां कस्यामवस्थायां त्यक्तुं शक्यत इति प्रश्ने संस्कृतपुस्तकानां लेखानाञ्चोपस्थितिर्वैद्युतमाध्यमेषु न्यूना वर्तत इति हेतोः सन्दर्भसामग्रीसूच्यां अन्तर्जालसङ्केतरहितानां सामग्रीणां सन्दर्भाङ्कने प्रकाशकस्तत् स्थानञ्च नितरामावश्यको भवति, यदि पुस्तकेऽन्तर्जालसङ्केतो विद्यते चेत् प्रकाशकं प्रकाशनस्थानं त्यक्तुं शक्यत इति संस्कृतशोधलेखेनेऽपि सैव सरणी परिपालनायात्र प्रस्ताव्यते।

अत्र संस्कृतसन्दर्भसामग्रीसूचीषु अधस्तनक्रमेण अङ्गसंयोजनाय प्रस्ताव्यते-

**१.ग्रन्थपद्धत्यनुसारं पुस्तकानां स्रोतोनिर्देशप्रक्रिया**

क) ग्रन्थनाम (वक्राक्षरेण),

ख) टीकाकारानुवादकादीनां विवरणम् (अस्ति चेद् ग्रन्थनामान्ते कोष्ठकमध्ये लेख्यम्),

ग) ग्रन्थकारः,

घ) प्रकाशकः :

ङ) प्रकाशनस्थानम्,

च) प्रकाशनवर्षम् (विक्रमीयवर्षं अस्ति चेत् किमपि न लेख्यम्, इसवीयादौ आद्यसङ्केतो लेख्यः, यथा ई.),

छ) अन्तर्जालसङ्केतः (अस्ति चेत्).

लेखे यदि https:/URL/DOI वर्तते चेत्- प्रकाशकं प्रकाशनस्थानं च त्यक्त्वा अन्तर्जालसङ्केत एव लेखनीयः, यथा-

क) *ध्वन्यालोकः* (लक्ष्मीटीकासहितः), आनन्दवर्धनः, चौखम्बा विद्याभवनः वाराणसी, ई.२०११।

ख) *भारतीयदर्शनम्,* उमेशमिश्रः, https://archive.org/details/in.ernet.dli. 2015.306972.

**२.ग्रन्थकारपद्धत्यनुसारं पुस्तकानां स्रोतोनिर्देशप्रक्रिया**

क) ग्रन्थकारः,

ज) ग्रन्थः (वक्राक्षरेण),

झ) टीकाकारानुवादकादीनां विवरणम् (अस्ति चेद् ग्रन्थनामान्ते कोष्ठकमध्ये लेख्यम्),

ख) प्रकाशकः :

ग) प्रकाशनस्थानम्,

ञ) प्रकाशनवर्षम् (विक्रमीयवर्षं अस्ति चेत् किमपि न लेख्यम्, इसवीयादौ आद्यसङ्केतो लेख्यः, यथा ई.),

ट) अन्तर्जालसङ्केतः (अस्ति चेत्).

लेखे यदि https:/URL/DOI वर्तते चेत्- प्रकाशकं प्रकाशनस्थानं च त्यक्त्वा अन्तर्जालसङ्केत एव लेखनीयः, यथा-

क) आनन्दवर्धनः, *ध्वन्यालोकः* (लक्ष्मीटीकासहितः), चौखम्बा विद्याभवनः वाराणसी, ई.२०११।

ख) उमेशमिश्रः, *भारतीयदर्शनम्,* https://archive.org/ details/in.ernet.dli.2015.306972.

**३.वैद्युतसंसाधनेभ्यः स्रोतोनिर्देशप्रक्रिया**

ठ) लेखक/निर्मातृ/निर्देशकनाम,

ड) सामग्रीशीर्षकम् (एकल उद्धरणचिह्नमध्ये, अस्ति चेत्),

घ) प्रकाशकः (वक्राक्षरेण):

ङ) प्रकाशनदिनाङ्काः

ढ) अन्तर्जालसङ्केतः (अस्ति चेत्)

सामग्र्यां यदि https:/URL/DOI वर्तते चेत्- प्रकाशनस्थानं त्यक्त्वा अन्तर्जालसङ्केत एव लेखनीयः, यथा-

क) अभिराजराजेन्द्रमिश्रः,'संस्कृतस्य सतत-निरन्तरता' (हिन्दीभाषायां- संस्कृत की अटुट निरन्तरता), *युट्युब, १ जुन २०२४, https://www.youtube.com/shorts/MTVlp1g_9Ak.*

ख) विद्यानाथ उपाध्यायः, 'दर्शन दर्शन-विद्यानाथ उपाध्याय भट्टः' फेसबुक, १० जुन २०२२,

https://www.facebook.com/lambakarnabhatta/videos/3159911110890553

**४.पत्रिकाभ्यः स्रोतोनिर्देशप्रक्रिया**

क) लेखकः/पत्रिकानाम (एकस्योल्लेखः कार्यः, पत्रिकानाम्नि वक्राक्षर आवश्यकः),

ख) लेखशीर्षकम् (उद्धरणचिह्नमध्ये, यथा- 'अपाणिनीयशब्दप्रयोगविमर्शः'),

ग) पत्रिकानाम (लेखकादारब्धे पत्रिकानाम तृतीये क्रमे वक्राक्षरेण लेखनीयम्, यथा-*संस्कृतविमर्शः*),

घ) कोष्ठकमध्ये वर्षः..., अङ्कः..., प्रकाशनतिथिश्च (यथा- वर्षः- ४, अङ्कः-७, वि.सं.२०८२ पौषः ९),

ङ) प्रकाशकः,

च) प्रकाशनस्थानम्,

छ) अन्तर्जालसङ्केतः (अस्ति चेत्).

लेखे यदि https:/URL/DOI वर्तते चेत्- प्रकाशकं प्रकाशनस्थानं च त्यक्त्वाऽन्तर्जालसङ्केत एव लेख्यः, यथा-

क. विपिनकुमारझाः, 'संस्कृतानुसन्धानार्थं वैद्युत उपकरणानामुपयोगिता' *संस्कृतविमर्शः*, (अङ्कः-२६, ई.२०२४), https://vimarsah.sanskrit.ac.in/v26/SA.

ख. वेणीमाधवढकालः,'पाण्डुलिपिसम्पादनपद्धतिः' *वाल्मीकिप्रज्ञा*, (वर्षः-१,अङ्कः-१,२०६९), ने.सं.वि. प्राध्यापकसंघः : काष्ठमण्डप-नेपालः ।

## सन्दर्भाङ्कनप्रक्रियाबोधप्रयोजनम्

उपाधिप्रयोजनेन रचितेषु भारतीयेषु, नैपालेषु, अन्यदेशीयेषु च संस्कृतशोधनिबन्धेषु गर्भटिप्पनीनिर्माणे, पादटिप्पनीनिर्माणे सन्दर्भसामग्रीसूची निर्माणे च अनैक्या संरचना, शैली, प्रविधिः स्वरूपञ्च यत्र तत्र प्रयुज्यमानं दृश्यत इति तेभ्यः तेभ्यः निकायेभ्यः शैक्षिककेन्द्रेभ्यश्च प्रकाशितानां शोधनिबन्धानां पर्यवेक्षणेनावबुध्यते। तेन विश्वविद्यालयान्तरीयाणां शोधानां सन्दर्भाङ्कने जातायामनेकतायामेकरूपताऽऽनयनाय लेखोऽयं सहयोगं विधास्यत इति प्रकृतनिबन्धस्योद्देश्यम्। अतः तथाविधासु अनैक्यासु स्थितिषु एकरूपताऽऽनयनार्थमुदाहरणमुखेन दिङ्निर्देशः प्रकृतलेखस्य मुख्यं प्रयोजनं वर्तते।

## निष्कर्षः

अन्तर्जालं नाम वैद्युतजालम्। अस्मिन् जालपुटे संस्कृतवाङ्मयसम्बद्धा नैकाः सामग्र्यो निक्षिप्ता दृश्यन्ते। अनेकैः शैक्षिकनिकायैः, वाङ्मयसेवकैः, वणिग्भिश्च विभिन्नेन प्रयोजनेन- पिडिएफपुस्तकानि, शोधपत्रिकाः, प्रतिवेदनानि, सूचनाः, प्रवचनानि, विचाराः, अनुभूतयः, सिद्धान्ताः, धारणाः, श्रव्यदृश्यसामग्र्यः, प्रस्तुतयश्च यथाप्रयोजनं तत्र स्थाप्यन्ते। पाठकेनापि आवश्यकतानुसारमन्विष्य गृह्यन्ते च, तत्र सत्यावश्यके स्वकीयाः टिप्पन्योऽपि प्रस्तूयन्ते च, तत्र सामग्रीप्रकाशने न्यूनधनव्ययः, दूरतोऽपि वीक्षणटिप्पनादिसौलभ्यम्, भौतिकपुस्तकवहनभाराभावादयो लाभाः सन्ति, अतो बहवोऽनुसन्धातारो वैद्युतसंसाधनं प्रत्याकर्षिता दृश्यन्ते। एतादृशान् लाभान् ग्रहीतुकामाः संस्कृतजिज्ञासवोऽनुसन्धातारोऽपि शोधप्रबन्धग्रन्थादिनिबन्धने, अन्यविधेषु गवेषणेषु च पूर्वोक्तमेव जालपुटं प्रयुञ्जानाः सन्ति। परमत्र जालपुटे स्थापितानां सामग्रीणां समुद्धरणे छात्रेषु शोधनियमज्ञानाभावेन, परम्परामोहेन, निकटस्थशैक्षिकनिकायप्रभावादिभिर्वा स्पष्टं वैभिन्यं परिलक्ष्यते। एतेन संस्कृतशोधनिबन्धेषु प्रविधिसौगन्धं प्रतिदिनं क्षीयमाणं प्रतीयते। प्रविधिषु दृष्टमेतद्विधं अनैक्यं भ्रष्टत्वं च निवार्य तत्रैकताऽऽनयनाय शोधनिबन्धोऽयं प्रकल्पितो वर्तते, अतोऽनेन निबन्धेन विशेषतोऽन्तर्जालतः सामान्यतो ग्रन्थपत्रिकाशोधादिभिश्च समुद्धृतानां सामग्रीणां गर्भटिप्पनी-पादटिप्पनी-सन्दर्भसामग्रीसूचीनिर्माणसम्बद्धा च सरणिः सनिदर्शनं प्रस्तुताऽस्ति। अमुस्माच्च शोधनिबन्धाद् जिज्ञासवः संस्कृतशोधार्थिनः तासु तासु च समस्यासु स्पष्टतामर्जिष्यन्तीति निश्चीयते। एतस्मिन् क्रमे- अन्तर्जालतो गृहीतसामग्रीणां सन्दर्भाङ्कनप्रक्रिया' इत्यस्य कोऽर्थः ? ततो गृहीतसामग्रीणां सन्दर्भाङ्कनं केन प्रकारेण विधीयते ? तथाविधायाः सन्दर्भाङ्कनप्रक्रियायाः किं मूल्यमिति प्राविधिकं प्रश्नत्रयं कृत्वा तन्माध्यमेन समस्याया अध्ययनं समाधानञ्चात्र विहीतमस्ति। एतेनाध्ययनेन वैद्युतसंसाधनभौतिकपुस्तकादीनां सन्दर्भाङ्कने समाना प्रक्रिया प्रस्ताव्यते। एवमेव

गर्भटिप्पन्यां पादटिप्पन्यां च समानया रीत्या सन्दर्भाङ्कनप्रयोगाय अपि प्रकृतेन लेखेन प्रस्ताव्यते, अतोऽत्र स्रोतस्समुद्धरण-लेखकनाम-सामग्रीशीर्षक-पृष्ठसङ्ख्या-पृष्ठाङ्काँश्च समुल्लिख्य भौतिके वैद्युते च पुस्तके गर्भटिप्पनी-निर्माणाय पादटिप्पनीनिर्माणाय च परामर्शः प्रदीयते। टिप्पनीनिर्माणे स्रोतस्समुद्धरणमावश्यकं न वेति जिज्ञासा जायत एव। केषुचित् समुद्धरणेषु भावहरणमेव विधीयत इति सर्वत्र स्रोतसमुद्धरणं न क्रियते, तथैव केषुचित् लेखककेन्द्रितेषु समुद्धरणेषु गर्भे पादे च लेखशीर्षकमपि न लिख्यत इति गर्भपादयोर्निर्माणे स्रोतस्समुद्धरण-लेखशीर्षकयोः प्रयोगो विशिष्टेषु स्थानेष्वेव भवतीति अवधेयम्। अत्र प्रकृतेन लेखेन लघूद्धरणस्य दीर्घोद्धरणस्य च प्रयोगसरणिस्तथा सीमा प्रस्ताविता वर्तते, तद्यथा- एकपङ्क्तियुतायां कवितायां गद्यरचनायां वा पाठमध्य एव समुद्धरणं संयोज्य प्रयोक्तव्यम्, ततो दीर्घायां सत्यां तु अधस्ताद् दीर्घानुच्छेदरूपेण समुद्धरणीयमिति परामृश्यते। सन्दर्भसामग्रीसूची ग्रन्थपद्धत्या ग्रन्थकारपद्धत्या वा निर्मेया भवति। प्राचीना वेदोपनिषदारण्यकब्राह्मणग्रन्थसदृशा महत्त्वाधायिनो ग्रन्थाः केचन लेखकरहिता कति लेखकगोपिता अपि सन्ति। तेषां सन्दर्भाङ्कनमधुनापि ग्रन्थपद्धत्या जायमानमस्तीति तदनुरोधेन प्राचीनानां ग्रन्थकाररहितानां तथाप्रचलितानां च ग्रन्थानां कृते ग्रन्थपद्धतिस्तदितरेषां तु ग्रन्थकारपद्धतिश्चेति अत्र पद्धतिद्वयमेव स्वीकार्यमिति प्रकृतलेखस्य प्रस्तावः। ग्रन्थपद्धतौ ग्रन्थस्तथा ग्रन्थकारपद्धतौ ग्रन्थकार आदौ आयाति, अन्यत् सर्वं समानमेवेति संस्कृतसन्दर्भसामग्रीसूच्यां- आदौ ग्रन्थो ग्रन्थकारो वा लेखनीयो भवति। ग्रन्थकारपद्धतौ तु प्रथम-मध्यम-पारिवारिकं नाम चेति क्रमेण नामानि लेखनीयानि। ग्रन्थान्ते कोष्ठके टीकानुवादकादीनां नाम, ततो भौतिकेषु ग्रन्थेषु सत्सु प्रकाशकः प्रकाशनस्थानं प्रकाशनवर्षञ्चेति अङ्गत्रयमावश्यकमिति मत्वा तथैव प्रस्ताव्यते। जालसङ्केतयुतानां लेखानां समुद्धरणे तु प्रकाशकप्रकाशनस्थाने नावश्यके। यतो हि जालादेव उक्ता सूचना प्राप्यते चेत् पुनरावृत्तिर्नावश्यकीति आशयेन तयोस्त्यागाय परामृश्यते। तथैव पत्रिकाभ्यः स्रोतस्सु समुद्धृतेषु सन्दर्भसामग्रीसूच्यां तासां समुल्लेखने किञ्चिद् वैशिष्ट्यं भवतीति तदनुसारमेव सूचीनिर्माणार्थमत्र प्रस्ताव्यते, यथा- लेखकनाम पत्रिकानाम वा (आदौ लेखके सति पत्रिकानाम तृतीये क्रमे वक्राक्षरेण आयाति, आदौ पत्रिकानाम्नि सति तदनु लेखकस्य टीकानुवादकादीनां वा नाम कोष्ठके आयाति), लेखशीर्षकम् (उद्धरणचिह्नमध्ये), वर्षोऽङ्कः प्रकाशनतिथिश्च (कोष्ठकमध्ये), भौतिकेषु प्रकाशकः प्रकाशनस्थानञ्च क्रमशः प्रयोक्तव्यमिति प्रस्ताव्यते। अन्तर्जालसङ्केतयुते लेखे तु प्रकाशनतिथि-प्रकाशनस्थानञ्च नावश्यकमिति प्रकृतलेखस्य प्रस्तावः। गर्भटिप्पनी-पादटिप्पनी-सन्दर्भसामग्रीसूचीनिर्माणेषु च संस्कृतशोधार्थिषु दृष्टाऽस्पष्टता अपगच्छेदिति धिया लेखोऽयं प्रकल्पितः, अतस्तन्निवारणमेव प्रस्तुतशोधनिबन्धस्य मुख्यमुद्देश्यम्।

## कृतज्ञताज्ञापनम्

प्रकृतलेखः 'विश्वविद्यालय-अनुदान-आयोगः नेपालः' इत्यस्य शैक्षणिकविभाग सम्बद्धमनुसन्धानम् (Faculty Research, FRG-2078-079-H&S-04) इत्यस्य परिपूर्तये 'संस्कृत-अनुसन्धानपद्धतिः' शीर्षके कृतस्य

शैक्षणिकानुसन्धानस्याङ्गभूतमस्ति। अतः प्रकृतशोधशीर्षकेऽनुसन्धानार्थमनुमतिं प्रदत्तवते 'विश्वविद्यालय-अनुदान आयोग-नेपालः' इत्यस्मै हार्दं धन्यवादं ज्ञापयामः। तथैव येषां सौजन्येन प्रकृता समस्या समुद्भूता, सामग्र्यश्च मिलिता लेखोऽयं प्रकाशितश्च विद्यते, स्रोतोभूतास्ते सर्वे अभिनन्दनीया वर्तन्ते, अतस्तथाविधान् समस्याग्रस्तान् छात्रान्, सामग्रीप्रदायकान् सकलान् समुत्प्रेरकाँश्च धन्यवादशब्दपुष्पोपहारैः कार्तज्ञ्यं विनिवेदयामः।

## सन्दर्भसामग्रीसूची

आचार्यः, सत्यनारायणः (ई.२००५), *संस्कृतशोधप्रविधिः*, श्रीमती सौदामिनी त्रिपाठी।

आचार्यः, हरिप्रसादस्तथान्यः (२०४२), *अनुसन्धान प्रकाशः*, महेन्द्र संस्कृत विश्वविद्यालय।

कण्णन्, एन.आर.(ई.२०१६), *शोधप्रविधिः पाण्डुलिपि विज्ञानञ्च*, राष्ट्रिय संस्कृत संस्थान।

खाँ, मोहम्मदः (ई. १९८५), *संस्कृत शोध लेखमाला*, क्रिसेस्ट पब्लिसिङ हाउस।

घर्ती, दुर्गाबहादुरः (२०८०) *अनुसन्धान पद्धति : सिद्धान्त र प्रयोग*, अनुसन्धान विमर्श नेपाल।

घिमिरेः, मनोजः (२०७५), *शुक्लयजुर्वेदे पारिभाषिकशब्दाः* (अप्र.स्नातकोत्तर शोधः), के. सं. विभागः त्रिवि।

चालिसेः, नारायणः (सम्पा.), (२०७०) *अनुसन्धानप्रकाश* (वर्ष–६, पूर्णाङ्क–३), नेसंवि अनुसन्धान केन्द्र।

जड्डीपालः, विरूपाक्षः (ई.२०२२) 'प्राच्यविद्याक्षेत्रे अनुसन्धानसमस्याः तन्निराकरणोपायाश्च' *प्राच्यविद्या मे अनुसन्धान के विविध आयाम*, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, पृ.१–६।

ढकालः, वेणीमाधवः (२०६९), 'पाण्डुलिपि सम्पादन पद्धति' *वाल्मीकिप्रज्ञा* (वर्ष–१, अङ्क–१), ने.सं.वि. प्राध्यापक संघ, वाल्मीकि विद्यापीठ, एकाइ, पृ.८९–९८।

तिवारीः, प्रकाशः (२०८१), *अनुसन्धानपद्धतिः*, सङ्गीता भण्डारी।

त्रिपाठीः, भागीरथप्रसादः (ई.१९५९), *अनुसन्धान पद्धति*, वाराणसेय संस्कृत विश्वविद्यालय।

त्रिपाठीः, वासुदेवः (२०६०), 'शोध र शोध प्रक्रियाका विभिन्न चरण' *शोध र सिर्जना सिद्धान्त* (लेख संग्रह, (सम्पा.भूपहरिपौडेल), विद्यार्थी पुस्तक भण्डार, पृ.२७७-३०४।

त्रिपाठीः, हेरामः (सम्पा.) (२०२२), *प्राच्यविद्या में अनुसन्धान के विविध आयाम*,सम्पूर्णानन्द संस्कृतविश्वविद्यालय।

दाहालः, दुर्गाप्रसादः तथान्ये (२०७५), *अनुसन्धान विधि*, काडमाडौं : एम.के. पब्लिसर्स।

द्विवेदीः, प्रभुनाथः (ई.२०१७), *संस्कृत शोधप्रविधिः*, वाराणसी : महात्मागान्धी काशी विद्यापीठ।

द्विवेदीः, रहसः *अनुसन्धान सम्पादन प्रविधि* (सम्पा. मुरलीमनोहर पाठक), लालबहादुर केन्द्रीय संस्कृत विश्वविद्यालय।

नगेन्द्रः (ई.२०१८), *अनुसन्धानस्य प्रविधिप्रक्रिया* (अनु.हर्षनाथमिश्रः), राष्ट्रिय संस्कृत संस्थान।

निरौलाः, यज्ञेश्वरस्तथान्ये (२०८१), *अनुसन्धानको रूप र शैली*, लोकनाथ लुइँटेल स्मृति प्रतिष्ठान।

पाठकः, मुरलीमनोहरः (ई.२०२३) *अनुसन्धान सम्पादन प्रविधि*, लालबहादुर शास्त्री राष्ट्रिय सं.विश्वविद्यालय।

भट्टराईः, टीकाः (२०४८), *अनुसन्धान पद्धतिः*, कान्ता भट्टराई।

भट्टराईः, भवानीशङ्करस्तथान्ये (२०८१), *संस्कृतानुसन्धानपद्धतिः* (फ्याकल्टी अनुसन्धान), विश्वविद्यालय अनुदान आयोगः नेपालः ।

भण्डारीः पारसमणिस्तथान्ये (२०७५), *अनुसन्धानविधिः,* विद्यार्थी पुस्तक भण्डार ।

मिश्रः, अभिराजराजेन्द्रः (ई.२०१७) *शोधप्रविधि एवम् पाण्डुलिपि विज्ञान*, अक्षयवट प्रकाशन ।

लम्सालः, रामचन्द्रः (२०७९), *अनुसन्धान विधिः*, सनलाइट पब्लिकेसन ।

शास्त्री, वागीशः (२०७०), *अनुसन्धान सम्पादन प्रविधिः*, वाग्योगचेतना प्रकाशन ।

श्रेष्ठः, दयारामः (२०७९), *साहित्यको अनुसन्धान व्यवस्थापन*, शिखा बुक्स ।

**English References**

American Psychological Association (APA). (2020). APA Manual (7th ed.). American Psychological Association.

Chicago University (2017). Chicago manual of style (17th ed.). University of Chicago Press.

Modern Language Association (MLA). (2021) MLA Hand book. (9th ed.). Modern Language Association of America.

**अन्तर्जालसम्बद्धानि स्रोतांसि**

https://tucl.tu.edu.np/pages/nepjol-1462

https://shodhganga.inflibnet.ac.in/

https://doi.org/10.18231/j.ijlsit.2023.009

https://vimarsah.sanskrit.ac.in/v26/SA6.php

https://www.From_Grammar_to_Algorithms_The_DigitalTransformation_ofSanskrit_Studies

https://www.researchgate.net/publication/378909001_Sanskrit_E-Resources_on_the Internet

https://www.youtube.com/watch?v=onA8-LXCvzM&list=RDonA8-LXCvzM&start_radio=1